केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — २१२

भागवतचम्पूः

रामपाणिवादकृता ।

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६४/११३९

मूल्यं रूप्यकचतुष्टयम् ।

INTRODUCTION

We have published in the Trivandrum Sanskrit Series several works of Rāmapāṇivāda in the past[1]. His *BHĀGAVATACAMPŪ* considered by many as one of the finest of his works is published now as No. 212 of the same series.

Rāmapāṇivāda, as is well-known, belonged to the Nambiyār community whose traditional profession was to accompany the Cākiārs on the Miḻāvu in the performance of the Kūttu and Kūṭiyāṭṭam. Rāmapāṇivāda himself has given some information about him in his works. He had an uncle named Rāghava who was a learned scholar. Rāmapāṇivāda mentions a Nārāyaṇa Bhaṭṭa as his teacher[2]. This Nārāyaṇa Bhaṭṭa is to be clearly differentiated from the author of the Nārāyaṇīya for he flourished before 1650 A.D. whereas Rāmapāṇivāda

---

1.	*Rāghavīya*	-	*T. S. S. No. 146.*
	Viṣṇuvilāsa	-	*T. S. S. No. 165.*
	Sītārāghava	-	*T. S. S. No. 192.*
	Madanaketucarita	-	*T. S. S. No. 161.*
	Vṛttavārtika	-	*T. S. S. No. 131.*
	Mukundaśataka	-	*T. S. S. No. 157.*
	Bhāgavatacampū	:	*Vol XI, No.1 to Vol XIII, No.1.*

2. श्रीनारायणभट्टपादगुरुपादानां कृपानुग्रहः
श्रीकृष्णस्य कथां कथापयति यं चम्पूप्रबन्धात्मिकां

Bhāgavatacampū, 1.

lived nearly a century later. He is generally identified, though without conclusive evidence, with a Nārāyaṇa Bhaṭṭa of Tekkeṭattu family who was the minister of king Devanārāyaṇa of Ambalapuḷa[3].

1. Rāmapāṇivāda and Kuñcan Nambiyār.

The identity of Rāmapāṇivāda and the Malayalam poet Kuñcan Nambiyār has been a subject of controversy among scholars for long. The problem has been thoroughly examined; yet no definite conclusion has been arrived at. Briefly, the following are the arguments put forth for and against the identification.

For the identity: Both Rāmapāṇivāda and Kuñcan Nambiyār were contemporaries. Both belonged to the Nambiyār community and both of them seem to have belonged to the Kalakkatt family near Kiḷḷikkuriśśimaṅgalam. Kuñcan is only a pet name and even now the senior-most member of the Kalakkattu family is known by that name: Rāma might have been his personal name. In some Tullal works, Kuñcan Nambiyār shows that he is quite well-versed in Sanskrit and Prākṛt also. Some manuscripts of the Ekādaśīmāhātmya and Śivapurāṇa, both admittedly works of Kuñcan Nambiyār, contain

3. *See. Ullur S. Parameswara Aiyar, Keralasāhityacaritram, P. 357.*

colophons attributing them to Rāmapāṇivāda[4].

Against the identity: Rāmapāṇivāda mentions his teacher Nārāyaṇa Bhaṭṭa in almost all his works; Kuñcan Nambiyār does not mention a teacher named Nārāyaṇa Bhaṭṭa in any work. On the other hand he mentions Droṇampaḷḷi Potti and Nandikkara Bālaravi Kurup as his teachers to whom no reference is made by Rāmapāṇivāda. Rāmapāṇivāda mentions Pāliyat Accan and Ārya Śrīkaṇṭhan of Maṇakkuḷam as his patrons; none of these find any place in the Tullal works of Kuñcan. Kuñcan mentions Kārtika Tirunāl Rāmavarman of Travancore (1724-1798 A. D); Rāmapāṇivāda mentions him nowhere. On the other hand Rāmapāṇivāda mentions King Mārttāṇḍavarman of Travancore who died in the year 1758 A. D. All this would show that Rāmapāṇivāda must have been an elder contemporary of Kuñcan Nambiyār[5].

---

4. *See: Ullur S. Parameswara Aiyar, Kerala Sahitya Caritram Vol. III. pp. 359 ff. M. R. Balakrishna Variyar, 'Kuñcan Nambiyār', Trivandrum. 1934. Dr. A. N. Upadhye, Introduction to 'Kaṁsavaho', Kolhapur, 1940. Dr. L. A. Ravi Varma, Introduction to 'Rāghavīya', T. S. S. No. 146.*

5. *See: Dr. C. Kunjan Raja, Introduction to 'Uṣāniruddha,' Adyar Library Series No. 42. Dr. P. K. Narayana Pillai, Introduction to 'Viṣṇuvilāsa', T. S. S. No. 164. Vadakkumkur Rajarajavarma Raja, 'Keralīyasaṁskṛtasāhityacaritram'.*

Additional light was thrown on the problem by the discovery of a few verses inscribed on a manuscript of Bālabhārata belonging to the Kalakkatt family[6]. Besides giving a good deal of information about Rāmapāṇivāda it also gives a list of the works of Rāmapāṇivāda This list while it contains almost all the works of Rāmapāṇivāda[7] mentions not a single work attributed to Kuñcan Nambiyār.

If we take these verses to be authentic then it would go to show conclusively that Rāmapāṇivāda and Kuñcan Nambiyār were different persons. It is further stated that Rāmapāṇivāda had a brother named Kṛṣṇa and a nephew named Rāma. We may suppose that Kuñcan Nambiyār was identical with any of these two[8].

2. *Date and Life.*

Unfortunately there is nothing in Rāmapāṇivāda's works that may go to fix the exact year of his birth. Ullūr is of the view that Rāmapāṇivāda must

---

6. *Quoted in Kerala Sahitya Caritram Vol, III, P. 347 ff. The verses are said to have been composed in 1765 A. D.*

7. *Apart from the Stotras of Rāmapāṇivāda a notable omission is that of the Bhāgavatacampū.*

8. *See. Dr. K. Kunjunni Raja, The Contribution of Kerala to Sanskrit Literature, p. 190.*

have been born in the year 1700 A. D.[9] But the arguments that he adduces to prove this are quite hypothetical. There is, however, nothing wrong in supposing that he was born either early in 18th century or towards the close of the 17th century.

If we are to believe that Rāmapāṇivāda's teacher was the Nārāyaṇa Bhaṭṭa who was the minister of King Devanārāyaṇa that would mean that Rāmapāṇivāda must have gone to Ambalappuḻa quite early in his life. The verses referred to above state that the king brought him up as if he were his own son[10]. This also would show that Rāmapāṇivāda must have become a favourite with the king early in his life. After the conquest of Ambalappuḻa by King Mārttāṇḍavarman of Travancore in 1750 A. D. Rāmapāṇivāda moved to Trivandrum and soon became a noted poet of the Travancore court. He was also patronised by other kings and chieftains of Kerala[11] According to tradition Rāmapāṇivāda is supposed to have died at Ambalappuḻa in the year 1770 bitten by a mad-dog[12].

---

9. *Ullur S. Parameswara Aiyar, op. cit, p. 355.*

10. क्षोणीदेवक्षितीशो निजमिव तनयं देवनारायणाख्यो
बाल्ये यं लालयित्वा.... ... ...
:- *See. Keralasahityacaritram, III, p. 348.*

11. *Among his works we have references to the king of Veṭṭattunāḍ, king Ārya Śrīkaṇṭha Rāmavarma of Maṇakkulam and the chieftain Pāliyat Accan.*

12. *See Ullur S. Parameswara Aiyar, op. cit. p. 373.*

But it is doubtful whether this refers to Rāmapāṇivāda or Kuñcan Nambiyār.

8. Works of Rāmapāṇivāda :

As said above one of the verses that are found inscribed in a manuscript belonging to the Kalakkattu family gives a list of Rāmapāṇivāda's works. The works mentioned therein are 1. Viṣṇuvilāsa, 2. Kaṁsavaho, 3. Uṣāniruddha, 4. Rāghavīya, 5. Candrikā vīthī, 6. Līlāvatī vīthī, 7. Sītārāghava, 8. Madanaketucarita, 9. Tālaprastāra, 10. Vṛttavārtika, 11. Vilāsinī, commentary on Kṛṣṇavilāsa and 12, Prākṛtasūtravṛtti, commentary on the Prākṛtasūtras of Vararuci.

Apart from these Rāmapāṇivāda's works also include the Bhāgavatacampū, Vivaraṇa, a commentary on the Dhātukāvya of Melputtūr Nārāyaṇa Bhaṭṭatiri, and four stotras, Mukundaśataka, Śivaśataka, Ambaranadīśastotra and Sūryāṣṭaka.

The Viṣṇuvilāsa[13] is a kāvya in eight cantos and describes the first nine avatāras of Viṣṇu as described in the Bhāgavata. It was written at the instance of Pāliyat Accan. There is a commentary on the work called Viṣṇupriyā, perhaps written by the author himself. The Rāghavīya[14] is another kāvya in twenty cantos

---

13. *T. S. S. No. 165.*
14. *T. S. S. No. 146.*

describing the story of the Rāmāyaṇa. Candrikā[15] and Līlāvatī[16] are two dramatic compositions of the vīthī variety. The Sītārāghava[17] is a drama in seven Acts based on the theme of Rāmāyaṇa. Madanaketucarita[18] is a drama of the Prahasana category. Kaṁsavadha[19] and Uṣāniruddha[2] are two Prākṛt kāvyas. The Tālaprastāra and Vṛttavārtika[21] deals with metres and their permutations. The Prākṛtasūtravṛtti[22] and Vilāsinī[23] are lucid commentaries on the Prākṛtasūtras and Kṛṣṇavilāsa respectively. His commentary on the Dhātukāvya[24] is a scholarly work. Mukundaśataka[25] and Ambaranadīśastotra are in praise of the dieties of Mukundapura and Ambalappuḷa. Sūryāṣṭaka is a short poem addressed to the Sun-god.

Among other works attributed to Rāmapāṇivāda by some scholars are Sūryaśataka[26], two plays Lalitarāghava and Pādukāpaṭṭābhiṣeka, and a commentary on

---

15. *Ms. No. C. 958 B.*
16. *Ms. No. C. 958 A.*
17. *T. S. S. No. 192.*
18. *T. S. S. No. 161.*
19. *Edited bg Dr. A. N. Upadhye, Kolhapur, 1940.*
20. *Edited by Dr. C. Kunjan Raja, Adyar, 1943.*
21. *T. S. S. No. 131.*
22. *Edited by Dr. C. Kunjan Raja, Adgar, 1946.*
23. *Ms. No. L. 1391.*
24. *Ms. No. R. 3656 (Madras).*
25. *T. S. S. No. 157.*
26. *See. Dr. Upadhye, op. cit.*

Līlāśuka's Śrīcihṇakāvya[27]. But these works have not been discovered yet. A few other works are also attributed to him though without any conclusive evidence[28].

6. Bhāgavatacampū:

Among the works of Rāmapāṇivāda the Bhāgavatacampū occupies a prominent place. Unfortunately, however, the complete work is not available. The manuscripts in this Library extends only up to the VII th stabaka. Moreover, the whole of stabaka II and part of stabaka I is also missing. We have not been able to secure any complete manuscript of the work in spite of our best efforts.

The Bhāgavatacampū is divided into seven stabakas and describes the story dealt in the tenth skandha of the Bhāgavatapurāṇa. Rāmapāṇivāda closely follows the Bhāgavata and there are no note-worthy deviations from it. Rāmapāṇivāda has included some Prākṛt verses too in the work but the practice of using Prākṛt exclusively for low characters is not followed.

Summary of Contents:

Stabaka I. The work begins with the Bhūmidevi's request to Brahma to put an end to evil men of the world. Viṣṇu promises to be born as the son of

---

27. *M. Krishnmachariar, History of Classical Sanskrit Literature, p. 257.*

28. *For details see. Dr. K. Kunjunni Raja, op. cit, pp.194-5.*

Vasudeva. Marriage of Devakī with Vasudeva. Kaṁsa's attempt to kill them and their subsequent imprisonment. Kaṁsa kills all the seven children born to Devakī. The eighth, Kṛṣṇa, exchanged with the daughter of Yaśoda and Nandagopa. Kaṁsa entrusts Pūtanā to kill Kṛṣṇa.

Stabaka II. This stabaka which is found missing in the Mss. should have consisted of the stories beginning with Pūtanāmokṣa till Kāliyamardana.

Stabaka III. The Kāḷiyamardana. Kṛṣṇa's putting out the forest-fire. Pralambavadha by Balarāma Theft of the clothes of the gopis. The sharing of the food brought by the wives of the brahmins.

Stabaka IV. Govardhanodhāraṇa and the submission of Indra Nandagopa's imprisonment by Varuṇa and his release by Kṛṣṇa. Rāsakrīḍā.

Stabaka V. Śāpamokṣa of a vidyādhara named Sudarśana. Murder of Vṛṣabhāsura and Keśi. Akrūra comes to invite Rāma and Kṛṣṇa to Mathurā. Departure for Mathurā. Lament of the gopis.

Stabaka VI. Arrival at Mathurā. Killing of the washerman. Curing the deformity of Kubjā. Breaking of the bow. Killing the elephant Kuvalayāpīḍa and the wrestlers. Kaṁsavadha. Release of Kṛṣṇa's parents.

Stabaka VII. Nandagopa and others sent back to Gokula. Kṛṣṇa befriends Uddhava. Learns all the

Śāstras from Sāndīpani. Reuniting Sāndīpani with his son. Jarāsandha defeated seventeen times. Construction of Dvāraka in the western sea. Killing of the Mleccha king by Mucukunda. Granting Mokṣa to Mucukunda and running away from Jarāsandha's attack.

We have no way to determine whether Rāmapāṇivāda ever completed the Bhāgavatacampū. No complete manuscript of the work has been found so far. But we may guess that Rāmapāṇivāda did intend to compose the latter portions of the story too from the fact that he introduces the character of Kucela as a class-mate of Rāma and Kṛṣṇa (p. 103): obviously for continuity when describing the later story of Kucela.

The Bhāgavatacampū is a work of some literary merit. The work seems to be a late composition of the author, for the grammatical exhibitionism that is evident in some of his other works is not found here. A more mature style is evident throughout the work.

For instance, the author seems to be overwhelmed by bhakti when he describes the figure of Kṛṣṇa.

१. व्यत्यस्ताङ्घ्रिसरोरुहास्थिति दरव्यानम्रकम्राननं
प्रत्यालीढनिकुञ्चितोरु निबिडव्यायत्तवक्षस्थलम् ।
अर्धामीलितनेत्रमूर्ध्वविचलद्वामभ्रु वामभ्रुवा-
माह्वानार्थमपूपुरन्मुरलिकामश्वत्थमूले स्थितः ॥

(p. 46.)

२. विद्येवात्मप्रबोधं सुविशदकविताबासनेवोक्तिगुम्फं
सत्काव्यप्रक्रियेव ध्वनिमनघतमा धर्मचर्येव कामम् ।
अद्वैतानन्दकन्दोद्गतकनकलतापाकमेकान्तरम्यं
बालं प्रासूत नीलाम्बुदरुचिरुचिरं केवलं देवकी सा ॥

(p. 11)

Like his predecessor Melputtūr Nārāyaṇa Bhaṭṭa, Rāmapāṇivāda too is quite judicious in the selection of words and metres in describing particular events and sentiments. For instance the following two verses from Kāḷiyamardana.

१. झलज्झलितनूपुरं चलितकिङ्किणीकङ्कण-
च्छटाकळकळोन्मिळन्मुरळिकारवाघोषितम् ।
अराळघनकुन्तळीशिथिलकेकिपिञ्छाञ्चलं
व्यराजदहिमस्तके मुरजितः शिशोस्ताण्डवम् ॥

२. प्रस्फुटिताग्रप्रगलितरक्तप्रवणितफणिपतिफणगणशृङ्गं
प्रस्रवणाभप्रसृमरघर्मद्रवरसयुतसरिदतनुतरङ्गम् ।
प्रक्षुभितान्तःश्वसनसमीरप्रचलिततततलविटपिसमूहं
निर्दयमेवं समजनि कालियमर्दनविहरणमहह ! मुरारेः ॥

(p. 23)

Rāmapāṇivāda introduces in the work many varieties of gadya too. The following passage is set to a fixed rhythm.

पारश्वधिकाः केचन कतिचन घोरभुसुण्ठीमुसलायुधकाः
पट्टसशूलगदाभृत एके ... ...

(p. 113-4)

Another instance of this type of gadya occurs on page 66.

V. Manuscripts used for the Edition :

We have used the following manuscripts and a transcript for preparing the present edition.

1. Ms. No: 2394- 'क'— (Palm-leaf) Contains only Stabakas III to V and a fragment of Stabaka VI.

2. Ms. No: 2374- 'ख'— (Palm-leaf) Contains up to Stabaka VIII. A portion of Stabaka I and Stabaka II are missing.

3. T. No. 1009 (Paper) — This is a copy of one of the above Mss.

I have been assisted in the edition of the work by Shri. A. Ramachandra Sastri, Research Officer and Shri. M. Madhavan Unni and Shri C. P. M. Namboodiri, Assistant Research Officers and Shri. V. Narayanan Nambootiri, former Assistant Research Officer.

Trivandrum
6 - 4 - 1964

K. Raghavan Pillai
CURATOR

॥ श्री ॥

रामपाणिवादप्रणीता

भागवतचम्पूः

हस्तिमस्तकमस्तोकं वस्तु स्वस्तिकृदस्तु नः ।
यत्तु प्रत्यूहविध्वस्तिं विधत्ते वस्तुतः स्तुतम् ॥ १ ॥

श्रीनारायणभट्टपादगुरुपादानां कृपानुग्रहः
श्रीकृष्णस्य कथां कथापयति यं चम्पूप्रबन्धात्मिकाम् ।
रामो नाम स पाणिवादकुलजः पाणी शिरस्यर्पयन्
ब्रह्मभ्यः प्रणतिं करोति खलु वः सभ्याः समभ्यागताः ॥२॥

लक्ष्मीकान्तेन पूर्वं निजनिशितमहाचक्रधारातिथित्वं
नीता ये दैत्यवीरा न तु गतिमगमन् कर्मशेषानुबन्धात् ।
तेष्वेवोद्भूय कंसप्रभृतिषु महतां धर्ममुन्मूलयत्सु
क्रान्ता भारेण तेषां शरणमुपययौ वेधसं भूतधात्री ॥ ३ ॥

तं च भगवन्तं पुलस्त्यपुलहप्रभृतिभिः तपोधनप्रवरैरमरैश्च शतमखप्रमुखैः समन्ततः समुपास्यमानमनवरतविकस्वरं कमलविष्टरमध्यासीनमाननचतुष्टयेनापि त्रयीमुच्चारयन्तमन्तरुन्मिषितसन्तोषप्रसरप्रसन्नमुखपङ्कजं पङ्कजासनं प्रणम्य सहजलज्जानुबन्धनामितकन्धरा विनयबन्धुरा वसुन्धरादेवी सबाष्पमन्थरमिदं विज्ञापयामास ॥

अनादृत्य व्रीळां प्रलपति समाजेषु महता-
मशङ्कं यद् योषा तदिह खलु दोषाय महते ।
तथाप्युच्चैरार्तिर्मुखरयति मां दुस्सहतमा
विवेकः क्व ब्रह्मन्! क्व च पुनरधीरा युवतयः ॥ ४ ॥

सोढव्याः सप्त दृप्तप्रसृमरकरिणोऽप्यद्रयः सप्त चैते
संभ्राम्यन्नक्रचक्रक्षुभितजलभरग्रस्तमुद्राः समुद्राः ।
लोकाः सप्तोपरिष्टादपि यदिह मया तेन सर्वंसहास्मि
ख्याता सत्यं तथापि क्लमयति खलु मां पापिनामेष भारः ॥ ५ ॥

तथाहि,

सज्जनेष्वनार्जवशालित्वेन नीतिमत्त्वं प्रथयद्भिः, दुर्जनमतानुसारित्वेन दाक्षिण्यं प्रकाशयद्भिः, दुर्यशसः सहिष्णुत्वेन धीरतां दर्शयद्भिः, ब्रह्मस्वापहारेणार्थार्जनसामर्थ्यं समर्थयद्भिः, अध्वरादिविध्वंसनेन अप्रतिहतशासनत्वं प्रख्यापयद्भिः, शत्रुकृतात्मतिरस्कारेषु अनाकुलत्वेन क्षमावत्त्वं व्यञ्जयद्भिः, अबलजनकुलोच्छेदनेन तीक्ष्णदण्डत्वमुद्भावयद्भिः, गुरुजनेषु अप्रवणत्वेनोच्छिरस्कतामुद्गमयद्भिः, गणिकाजनवशंवदत्वेनाभिगम्यतामापादयद्भिः, आत्मदारपरित्यागेन जितेन्द्रियत्वमुद्बोधयद्भिः, दुष्टसचिवदुरुपदेशग्रहणेन सर्वसाधारणाभिप्रायतां पिशुनयद्भिः, साधुजनहितोपदेशप्रत्याख्यानेन स्वतन्त्रतामुद्द्योतयद्भिः, अगम्यागमनेन पण्डितैः, अदण्ड्यदण्डनेन दण्डधारैः, अधर्मैरिव शरीरिभिः, अविनयैरिव सविग्रहैः, अज्ञानैरिवाकारवद्भिः, अहङ्कारैरिवाङ्गिभिः, अवनिपालसंज्ञयावतीर्णैः असुरैः समन्ततो निरन्तराला भवन्ति सम्प्रति निष्प्रकाशा मत्प्रदेशाः । अपि च, प्रलम्बारिष्टमुष्टिकचाणूरधेनुकपूतनादिपरिवारस्य भोजकुलपांसनस्य कंसस्य निर्मूलितभुवनशर्माणि कर्माणि कथङ्कारमाचक्षे । स खलु दुरात्मा,

सेण्णेहिं दुण्णअण्णोणिहिणिळअमहाणक्कचक्केहि साहं
साहंकारं भमंतो धुणइ वणंणईसेळमूळप्पइट्ठं ।
पब्भट्ठं सेससीसेहि विफिडिअदिसाअक्कदोग्घट्टथट्टं
खुट्टंतासंतबंधं खुहिअगुळुगुळाअंतसव्वण्णवंमं ॥ ६ ॥

[सैन्यैः दुर्नयाम्भोनिधिनिलयमहानक्रचक्रैः साकं
साहङ्कारं भ्रमन् धुनोति वननदीशैलमूलप्रविष्टम् ।
प्रभ्रष्टं शेषशीर्षेभ्यो विभ्रष्टदिशाचक्रदिग्घस्तियूथं
त्रुटयत्सन्धिबन्धं क्षुभितगुलुगुलायमानसौवर्णवर्म ॥]

किमिह बहुना जानास्येव त्वमेतदमेधसां
कपटचरितं कंसादीनामशेषमशेषवित् ।
मम खलु यथा भारः शान्ति व्रजेदचिरादसौ
विरचय तथा विश्वप्रीत्यै विधातरुपक्रमम् ॥ ७ ॥

इति वादिनीं मेदिनीमवलोक्य समुपजातकरुणातिरेको लोकेशो लोकपालानां मुखानि विलोकयन्निदमुदाजहार—

मा स्म क्राम्यादितः परं वसुमती भारेण पापात्मनां
मा चैतद्भरतो निकुञ्चितफणाचक्रः फणीन्द्रोऽपि भूत् ।
तद्भारेण च मा गमत् कमठराट् पृष्ठास्थिनिष्ठां रुजं
येनैतत् सुलभं समस्तमचिरात् तत् कर्म कुर्मो वयम् ॥ ८ ॥

गच्छामस्तावदिच्छाधिकमखिलजनप्रार्थितार्थस्य दातु-
र्विष्वक्सेनस्य विश्वप्रभवलयपरित्राणहेतोः सकाशम् ।
रूपैरापन्नतापप्रशमनचतुरैर्मत्स्यकूर्मादिभिर्यो
ह्येतस्या भूतधात्र्याः शुचमसकृदसावक्षतास्थं निरास्थत् ॥ ९ ॥

---

१. 'कै' खापठः.

इअ भणिअ समुट्ठिओ विहादा
सअमह वज्जिमुहेहि णिज्जिरेहिं ।
सह तह अ समं वसुन्धराए
णवरिअ वच्चइ खीरवारिरासिं ॥ १० ॥

[इति भणित्वा समुत्थितो विधाता
स्वयमथ वज्रिमुखैर्निर्जरैः ।
सह तथा च समं वसुन्धरया
सहसाव्रजत् क्षीरवारिराशिम् ॥]

दुग्धाम्भोधेरधितटमुपागत्य नित्यप्रकाशं
देवं देवैः सह सहृदयैः साधु तुष्टाव धाता ।
किञ्च स्वान्ते समधिकसमाधानसम्यक्प्रसन्ने
साक्षात्कुर्वन्नरमत महः किञ्चिदानन्दसान्द्रम् ॥ ११ ॥

जगाद च जगत्पतेरभिप्रायमवबुध्य विध्यण्डखण्डानामुत्पादनशिल्पी — ननु भो नभश्चरप्रवराः! एवमाज्ञयानुगृह्णाति वो भगवान् भार्गवीकान्तः । यदुत विदितमेवास्माभिरत्यन्तावलिप्तानामसुराणामवनिपतीनां च निर्मूलितधर्मतया ममाविद्दुर्मार्गपथिकानाममीषां कर्म । तदेषां निबर्हणाय यादववृष्ण्यन्धकभोजानामास्पदे समग्रसम्पत्सम्भूतिमधुरायां मधुरायां पुरे प्रादुर्भविष्यामि, यूयमपि वृष्ण्यन्धकादिषु मत्सहायार्थमुद्भवत, सुरपुरप्रमदा अपि प्रमदान्मदाराधनाय धरायामवतरन्तु । एवञ्च क्रमेण विगतविमतभारगौरवसुबन्धुरा भविष्यति वसुन्धरादेवीति ।

आअण्णन्तो विहिमुहपहेणुग्गअं सग्गिवग्गो
वाणिं वेणिं (पिवीविअ) महुमई मोहणिं माहवस्स ।

संतुस्सन्तो सदमहमुहो तक्खणं सग्गळोअं
संपत्तो तो स अ सअधई वंचए सच्चळोअं ॥ १२ ॥

[आकर्णयन् विधिमुखपथेनोद्गतां स्वर्गिवर्गो
वाणीं वेणीमिव मधुमयीं मोहनीं माधवस्य ।
सन्तुष्यन् शतमखमुखस्तत्क्षणं स्वर्गलोकं
सम्प्राप्तस्ततः स च शतधृतिरव्रजत् सत्यलोकम् ॥]

कालेऽस्मिन्नमराधिराजनगरश्रीगर्वनिर्वासिनी
विख्याता मधुरेति या खलु पुरी वृष्ण्यन्धकादेरभूत् ।
तस्यां शूरसुतः स कोऽपि वसुदेवाख्यो यदूनां पतिः
कन्यां कंससहोदरीमुदवहत् कल्याणिनीं देवकीम् ॥ १३ ॥

देवराजरमणीरमणीया
देवकस्य तनया विनयाब्धिः ।
देवकी निजगुणैर्वसुदेवं
देवकीर्तितमसावररञ्जत् ॥ १४ ॥

ततस्तावदुग्रसेनापत्यमुग्रसेनापत्यमाधितिष्ठन्नातिनिष्ठुरोऽपि सहजास्नेहेन मृदूभवन्नपरिमितमिभतुरगरथपत्तिपुरस्सरं यौतकद्रव्यभारं वधूवराभ्यामर्पयित्वा सकलभोजभूपतिकुलावतंसः कंसः प्रमदभरतरङ्गितस्तुरङ्गचोदनकृत्यमात्मनैव अनुतिष्ठन्निष्टरमणीलाभतुष्टमानसमानकदुन्दुभिमात्मभगिनीं च स्यन्दनमारोप्य प्रग्रहलाञ्छिताग्रहस्तः प्रहतपटुपटहभेरीभूरिरवपूरिताशाविवरेण चरणाहतिचलितदलितमेदिनीपरागपूरतिरस्कृताहस्कृता सैन्येन सह निजमन्दिरान्निर्जगाम ।

विप्राणां मणिहेमदिव्यवसनच्छत्रादि तत्रोत्सवे
लब्ध्वा वित्तमसंख्यमुद्धुरतरप्रीतिप्रमत्तात्मनाम् ।

उच्चैः स्वस्तिवचोभिरुन्नतकुचस्त्रीवर्गवक्त्रोदरा-
दुद्गीर्णैर्मधुरैरुलूलुनिनदैश्चापूरि सा पूरियम् ॥ १५ ॥

सारथ्यकर्मणि वधूवरयोः स्वकीयं
सामर्थ्यमद्भुततरं प्रकटीचिकीर्षुः ।
अश्वानचोदयदतिश्वसनेन गत्यां
वेगेन राजपथसीमनि भोजराजः ॥ १६ ॥

अथार्धमार्गे नभसोऽशरीरा-
माकर्णयामास गिरं नरेन्द्रः ।
स्वसुस्तवास्यास्तनयोऽष्टमस्त्वा-
मसशयं कंस! हनिष्यतीति ॥ १७ ॥

सक्रोधत्रासकम्पस्तदनु स कुटिलभ्रूकुटीभीषणास्यः
कोशादुत्खाय कृत्ताहितरुधिरसुरावीरपाणं कृपाणम् ।
केशेष्वाकृष्य चैतां प्ररुदितवदनां हन्तुकामः स्वसारं
क्रूरात्मा सान्त्ववादैः सपदि सशपथैः शौरिणा वारितोऽभूत् ॥

विरम विरम क्षोणीभर्तः! स्वसुर्वधसाहसा-
दहह! महती चित्तभ्रान्तिस्तवापि महामते! ।
नियतविपदो देहस्यार्थे कथं निविक्षसे
महति निरयश्वभ्रे शुभ्रेतराभिरकीर्तिभिः ॥ १९ ॥

हिंसा कंस! निषिध्यते निरपराधानां जनानां बुधै-
स्तत्रापि प्रमदाजनस्य सुतरां तत्रापि हाहा! स्वसुः ।
हेलादारितवैरिकण्ठविगलत्कीलालजालाम्भसि
स्नातः स्त्रीवधपङ्कसङ्करमसावर्हेत् कृपाणः कथम् ॥ २० ॥

जंतूणं जणणं मुणेहि मळणोअक्कं ण सक्कं पुणो
सक्कारेण वि विक्कमेण वि बळं दव्वस्स णिव्वासिउम् ।
सज्जो दुज्जसवज्जळेवघडिओ जीवो हि देहंतरं
संकंतो हि जहिं कहिं पि विगआवज्जो ण विज्जोअइ ॥२१॥

[जन्तूनां जननं जानीहि मरणोदर्कं न शक्यं पुनः
सत्कारेणापि विक्रमेणापि बलं दैवस्य निर्वासितुम् ।
सद्यो दुर्यशोवज्रलेपघटितो जीवो हि देहान्तरं
सङ्क्रान्तोऽपि यत्र क्वचिदपि विगतावद्यो न विद्योतते ॥]

भो भो! भोजनरेश्वरेण महता पाणौ गृहीताप्यहो
कण्ठाश्लेषरतासि खड्गलतिके! या त्वं परेषां परम् ।
तस्यास्ते कुलटाकुलोचितरतैर्युक्ता स्थितिश्चञ्चला
कामं नाम निरागसेऽपि नितरामस्मै कुतो द्रुह्यसि ॥२२॥

चला परेषां सुरताप्तिमाशु या
करोति कण्ठग्रहणादनन्तरम् ।
धृता त्वयासावसुहारिणी सखे!
कृपाणयष्टिर्गणिकेव राजते ॥२३॥

इत्यादिभिरपि वचनै-
रशिथिलदुर्वारसाहसारम्भम् ।
आनकदुन्दुभिरवदत्
पुनरपि तं भोजभूपालम् ॥२४॥

उत्पत्स्यन्ते नृवर! भवतो भागिनेयान्यपत्या-
न्यस्यां यानि प्रसभमयि! ते तानि सर्वाणि दास्ये ।

पश्चादिच्छासदृशमखिलं कंस! हिंसाप्यहिंसा-
प्येषामेषा विसृजतुतरामद्य भीतिं वराकी ॥ २५ ॥

तस्य तादृशं वचनमाकर्ण्य प्रशान्तामर्षः प्रहर्षमधिगम्य सौम्यतामापन्नः सम्यगनुमतिं प्रकाशयन् दुराशयोऽपि दयोदयसरस-हृदयः सादरं सहोदरीं तत्पतिं च तन्निकेतनमुपगमय्य निवृत्तो निर्व्यग्रमतिरौग्रसेनिः स्वभवनमेवाभिजगाम ॥

कतिषुचन गतेषु वत्सरेषु
प्रकृतिशुभा वसुदेवधर्मपत्नी ।
अभृत सपदि गर्भमर्भकं च
द्युतिततिमन्तमसूत कीर्तिमन्तम् ॥ २६ ॥

शूरात्मजः सपदि सत्यधनस्तनूजं
कंसाय धीरमतिरेनमुपाजहार ।
नास्माद् बिभेमि परमष्टमतो बिभेमी-
त्युक्त्वा प्रतिप्रदिशति स्म स चापि तस्मै ॥ २७ ॥

ताहे पंकअसंभवंकजणिओ वीणारओ णारओ
कंसं झत्ति गऊण जंपइ वओ भो! एस भोएस! दे ।
पेम्मो होस्सइ णिप्फळो बहिणिआ वच्चेसु देच्चेसुरा
तुझे बह्मणवच्छळा उण सुरा जादा इमे जादवा ॥ २८ ॥

[तदा पङ्कजसम्भवाङ्कजनितो वीणारतो नारदः
कंसं झटिति गत्वावदद् वचो भो! एष भोजेश! ते ।
प्रेमा भविष्यति निष्फलो भगिन्या वत्सेषु दैत्येश्वरा
यूयं ब्राह्मणवत्सलाः पुनः सुरा जाता इमे यादवाः ॥]

वृष्णीनां यादवानां च बान्धवो मधुसूदनः ।
असुरांशभुवो युष्मान् हन्तुमत्र जनिष्यति ॥ २९ ॥

इत्युक्त्वा गतवति नारदे सरोषं
गत्वासौ सपदि जघान कीर्तिमन्तम् ।
भूयोऽपि स्वसरि कृपामपास्य जातं
जातं च प्रसभमहन्नहो! कुमारम् ॥ ३० ॥

देवकीं वसुदेवं च बद्ध्वा शृङ्खलया खलः ।
किङ्कराणां शतैर्गुप्ते स्थापयामास मन्दिरे ॥ ३१ ॥

षड् गर्भाख्यानसुरतनयान् देवकीगर्भमार्गे-
णास्तभ्रंशां गतिमतिशुभां प्रापयामास पूर्वम् ।
पश्चादस्या जठरकुहरं वेशयामास विष्णुः
शेषं शेषं जननमपि च स्वात्मनो निश्चिकाय ॥ ३२ ॥

जठरं विशता तेन फणिना नीलवाससा ।
सप्तमं गर्भमाधत्त देवकी देवकीर्तिता ॥ ३३ ॥

या सा शौरेः प्रथममहिषी रोहिणी नाम साध्वी
पत्या पूर्वं पशुपसदनेऽधायि सापत्न्यभीत्या ।
तस्या गर्भे फणिपतिममुं देवकीगर्भतो द्रा-
गाकर्षन्ती न्यधित मधुजित्प्रेरिता योगनिद्रा ॥ ३४ ॥

स्वयं च गोकुलेन्द्रस्य नन्दगोपस्य धीमतः ।
वल्लभाया यशोदाया गर्भमाविशति स्म सा ॥ ३५ ॥

रोहिणी च रोहिणीरमणमिव पूर्णिमा शरकाण्डपाण्डुरशरीर-

महसं, तुहिनगिरिमेखलेव गङ्गाप्रवाहं, शङ्खशुक्तिरिव मुक्तामणिं, गर्भ-
सङ्कर्षणजनितसङ्कर्षणनामानमात्मजं जनयामास ।

ततिमिव तिमिराणामात्मतेजःप्रकर्षै-
रतनुभिरहितानां संहतिं संहरिष्यन् ।
अलमकृत स गर्भं देवकस्यात्मजाया
दिव इव दिवसेशस्तत्क्षणं पक्षिकेतुः ॥ ३६ ॥

गब्भट्ठिअस्स कसणस्स तणुप्पहाहिं
दिद्धं व दुद्धकणपद्धइणिग्गआहिं ।
अग्गं समग्गसुसमाणप ओहराणं
णीळत्तणेण बहु रेहइ देवईए ॥ ३७ ॥

[गर्भस्थितस्य कृष्णस्य तनुप्रभाभि-
र्दिग्धमिव दुग्धकणपद्धतिनिर्गताभिः ।
अग्रं समग्रसुषमयोः पयोधरयो-
र्नीलत्वेन बह्वराजत देवक्याः ॥]

सा तावदङ्गनिकरस्य निजस्य तन्वी
शक्तिक्षयादधिगताधिकगौरवाणाम् ।
भारं न सोढुमशकन्मणिभूषणानां
गर्भेशयः शिशुरिवामरदूषणानाम् ॥ ३८ ॥

तीसे निस्सेसविस्सेसरवसइवसाण्णिब्भरे गब्भभारे
पुण्णं पुण्णेण साहं णहअळपुहवीणाअळोअट्ठिआणं ।
काळे काळट्ठमीए सह घडिअमहारोहिणीमोहणीये
सज्जो उज्जोअमाणे विहुणि तिहुवणक्खेमहुत्ते मुहुत्ते ॥ ३९ ॥

[तस्या निश्शेषविश्वेश्वरवसतिवशान्निर्भरे गर्भभारे
पूर्णे पुण्येन साकं नभस्तलपृथिवीनागलोकस्थितानाम् ।
काले कालाष्टम्या सह घटितमहारोहिणीमोहनीये
सद्य उद्द्योतमाने विधौ त्रिभुवनक्षेमभूते मुहूर्ते ॥]

तत्र तावदासन्नावतारस्य भगवतः शरीरसुषमामिव प्रथममेव दर्शयद्भिरविरलतमालगुच्छसच्छायैराच्छादितहरिदन्तरैः निरन्तरधारानिकरपरिपूरितवसुन्धराविभागैः, जलाशयैरिवाराहितशतह्रदैः, ग्रहैरिवानुगतारासितैः, अम्बिकाकटाक्षैरिवानन्दितनीलकण्ठैः, परशुरामपराक्रमैरिवार्जुनारोपिताशिलीमुखैः, अम्बरतलावलम्बिभिरम्बुदकदम्बकैः उपघटितविकटशोभासनाथे निशीथे च समुपस्थिते,

विद्येवात्मप्रबोधं सुविशदकवितावासनेवोक्तिगुम्फं
सत्काव्यप्रक्रियेव ध्वनिमनघतमा धर्मचर्येव कामम् ।
अद्वैतानन्दकन्दोद्गतकनकलतापाकमेकान्तरम्य
बालं प्रासूत नीलाम्बुदरुचिरुचिरं केवलं देवकी सा ॥ ४० ॥

चतुर्भुजं शङ्खगदारिपङ्कजै-
रुपेतमुद्दीप्तकिरीटकुण्डलम् ।
सवन्यमालाङ्गदवत्सकौस्तुभं
ददर्श पीताम्बरमात्मजं पिता ॥ ४१ ॥

जाते तस्मिन् प्रसूनावलिमवचकरुः पुष्पमेघाः समन्ता-
च्छङ्खध्माः सङ्घशस्ते ननृतुरनिमिषा दुन्दुभीन् वादयन्तः ।
चित्रं भोः पद्मजन्मा मुनिभिरनुगतः कुण्डिकादण्डपाणि-
श्चक्रे शक्रेण साकं करधृतपविना हन्त ! सन्तोषनृत्तम् ॥ ४२ ॥

तमस्तुतां वस्तुत एव तद्गतं
विबुध्य तत्त्वं पितरौ मुदाकुलौ ।
दुरन्तसंसारसृजे निजेच्छया
चिरन्तनाय प्रभवे नमोऽस्तु ते ॥ ४३ ॥

जहिं खु तुइ विह्मए जणमणम्मि मोहाउळे
विअंभइ मदो जदो णिरअवाह्णिणा डज्झए ।
वुहो वि विवुहो विहो! स हि महाणुभावो भवं
भवण्णवविवट्टणं समउ णो रमावळ्ळह! ॥ ४४ ॥

[यत्र खलु विस्मृते त्वयि जनमनसि मोहाकुले
विजृम्भते मदो यतो निरयवह्निना दह्यते ।
बुधोऽपि विबुधो विभो! स हि महानुभावो भवान्
भवार्णवविवर्तनं शमयतु नो रमावल्लभ! ॥]

गिरामपि धियामपि त्वमसि यो विदूरस्थितः
स एव सकलात्मकः सकलनाथ! सन्दृश्यसे ।
अहो महदहो महत् सुकृतमेतयोरावयो-
रिदं च वपुरावयोर्विलयमस्तु चित्तेशयम् ॥ ४५ ॥

स्फुरन्मकरकुण्डलं मणिकिरीटभारोज्ज्वलं
विलोलवनमालिकामिलितहारदोरन्तरम् ।
चतुर्भुजमिदं गदाकमलशङ्खचक्राङ्कितं
वपुर्दधतमात्मजं जगति कोऽस्मदन्योऽध्यगात् ॥ ४६ ॥

षट्पुत्रीमतिमात्रनेत्रसुभगश्रीभागिनीमावयोः
कंसो हिंसितवान् कठोरहृदयो हाहा! कृपाम्भोनिधे! ।

अद्याप्येष परापतिष्यति यदि त्वज्जन्म विज्ञातवां-
स्तद्देव! प्रतिसंहरेदमसुरश्रीनिग्रहं विग्रहम् ॥ ४७ ॥

देवोऽप्येवं जगाद स्मितमधुरमये! पूर्वजन्मार्जितैर्वा-
मत्युत्कृष्टैस्तपोभिर्मम वपुरयते नेत्रयोः पात्रभूयम् ।
सूत्वा शेते कुमारीं पशुपनिलयने नन्दपत्नी यशोदा
तद् गूढं तात! तस्या मम च विनिमयं कुर्वितो निर्विलम्बम् ॥४८॥

इत्यभिधाय सद्य एव आद्यः पुमान् मनुजकिशोरभावमवलम्ब्य मातुरङ्के सङ्कुचितकरचरणपङ्कजो मुहुर्मुहुरारुदन्नुत्तानशयो निरतिशयतृष्णावेशेन रसनाञ्चललेलिह्यमानप्रस्नुतजननीस्तन्यलवो नवोडुराज इव नयनानन्दकरः चिरमहृत हृदयमदयकंसागमनशङ्काविषादकातरयोर्मातरपित्रोः । तत्रभवानानकदुन्दुभिस्तु पुत्रभावमुपगतस्य वृत्रारिसहोदरस्य निदेशादेनं करतलयुगलेन मातुरङ्कादुद्धृत्य सत्वरमेक एव निबिडतमोभरनिरालोके निरन्तरनिपतितजलदजलधाराकदम्बजम्बालितवसुन्धरे निशान्तेर निशान्ततो निश्चक्राम ।

वच्चंत तं वरिसविरसीभूदपादप्पआरे
मग्गे ळग्गे दलिअहरिणीळोवमेहिं तमोहिं ।
सेसो से सो कदुअ विहुणो आदवत्तं फणाहिं
वित्थिण्णाहिं फुडमाणिमऊहाहि गच्छेइ पच्छा ॥ ४९ ॥

[व्रजन्तं तं वर्षविरसीभूतपादप्रचारे
मार्गे लग्ने दलितहरिनीलोपमैस्तमोभिः ।
शेषस्तस्य स कृत्वा विभोरातपत्रं फणाभि-
र्विस्तीर्णाभिः स्फुटमणिमयूखाभिरगच्छत् पश्चात् ॥]

वातप्रेङ्खितकूलमुद्वहमहाकल्लोलहल्लोहलां
काळिन्दीमवगाहते स्म वसुदेवस्तां तरीतुं यदा ।
जाता सापि हि जानुदघ्नसलिला लीलाशिशुं बिभ्रतो
यातस्तस्य तदा वदामि किमहो! माया न मेया हरेः ॥५०॥

समुत्तीर्य च यमुनामनायासगतिः अतीतसरणिरानकदुन्दुभिः प्रसुप्तसकलगोपगोपीसमाकुलं गोकुलं प्रविवेश । प्रविश्य च तत्र कुत्राचित् सूतिकागारे प्रसववेदनाजनितमूर्च्छामुकुलितविलोचनोत्पलाया यशोदायाः समीपशायिनीम् अभिनवसुषमामृतझरीपरीतशरीराम् अचरमाशाभ्याशवर्तिनीमिव तुहिनांशुकलां कामपि कुमारीमवलोकयामास । ततश्च निजकुमारं निभृतमुपनीय यशोदायाः परिसरे शाययन्नायतलोचनां कुमारिकामादाय सास्रलोचनः स्वयं निवृत्य निवृत्य पुत्रमवलोकयन् कथञ्चिदेव शून्येन मनसा निवर्तते स्म ।

प्राप्य च मधुरां तेन
प्रहृष्यता कर्मणा च मधुरान्तेन ।
शयने सा रामायाः
स्वस्या निदधे गभीरसारा माया ॥५१॥

निशम्य तस्या रुदितं गृहोदरा-
न्निरस्तनिद्रास्तरसैव किङ्कराः ।
समेत्य कंसाय शशंसुरात्मजः
स्वसुर्महाराज! तवोदभूदिति ॥५२॥

क्वासौ क्वासाविति खलमतिः सत्वरं तत्र गत्वा
वीक्षाञ्चक्रे विमलसुषमाभागिनीं भागिनेयीम् ।
किं किं भोः! स्त्री कथमियमभूदष्टमी वाष्टमीदृग्
यद्वा तद्वा भवतु किमनेनेति तामग्रहीच्च ॥५३॥

मामा हिंसीर्मामकीनां तनूजा-
मद्यापि त्वं नासि कस्माद्दयालुः ।
आक्रन्दन्त्यामित्थमुक्त्वा भगिन्यां
सावज्ञस्तां कन्यकामाजहार ॥ ५४ ॥

अधिशिलमभिहन्तुमुच्चैरुदस्तादशस्ता-
वतंसस्य कंसस्य हस्तात् परिभ्रश्य वेगाद-
रिभ्रंशकारिण्यतिभ्राजमाना जगद्भ्रान्तिहेतु-
स्तदाभ्रान्तमुत्पेतुषी,
पृथुतरदृढचण्डदोर्दण्डषण्डात्तकोदण्ड-
चर्मासिकाण्डावलीशूलचक्रादिकक्रूरहेति-
च्छटाघोरधारासमुद्गीर्णकीर्णानलज्वाल-
लेलिह्यमानाम्बरा,
कनकघनकिरीटकूटाङ्गदापीडकाञ्ची-
तुलाकोटिताटङ्कसङ्क्रान्तमाणिक्यमुक्तादि-
रत्नप्रभाचित्रितोत्तंसमुग्धेन्दुरर्धेन्दु-
फालस्फुरच्चारुनेत्रोत्पला,
सुरमुनिहरिदीशवृन्देन मन्देतरानन्द-
सन्दानितान्तर्नितान्तोत्थितस्तोत्रगुम्फे
संभाविता सा जजृम्भे जगद्व्याप्तया तत्र
मूर्त्या च कीर्त्या च कात्यायनी ॥

भो भो वीरवतंस कंस ! भवता रोषेण तोषेण वा
मत्पादाववलम्बितौ खलु यतो न त्वां हनिष्याम्यहम् ।
जातः सम्प्रति भूतले शलभतां नेतुं भवन्तं खलं
बालः कोऽपि कृशानुरेव तदहं गच्छेयमिच्छानुगा ॥५५॥

इत्युदीर्य सत्वरं तिरोभूतयां च मुरारिसहजायां समधिक-साध्वसकम्पव्यग्रमतिरुग्रसेनात्मजस्तावदात्मसहजामानकदुन्दुभिं च विगळितनिबन्धनौ विधायात्मनः सद्म समासाद्य भगवत्यास्तद्वचन-मेवानुस्मारमनुस्मारमनुपलब्धनिद्रो निरन्तरदुश्चिन्तासन्तानजानित-दीर्घयामां त्रियामां कथञ्चिदतिवाहयामास ।

प्रभातायां तस्यां निशि निशितधीर्भोजनृपतिः
समास्थायास्थानीमसुरमनुजौघैरपिहिताम् ।
प्रलम्बादीनुर्वीतलविजयगर्वायिततमा-
नमात्यानित्यूचे निहितभयशल्येन मनसा ॥ ५६ ॥

दिव्या काचिदवोचदस्ति किल भो विस्तारिणि क्ष्मातले
बालः काल इवापरो मम किल प्राणान् हरिष्यत्यसौ ।
तद्यूयं वसुधामिमां विचिनुत द्रागेनमस्माद्रिपुं
दृष्टस्यास्य यतःकुतोऽपि कुरुत ध्वंसं च कंसद्विषः ॥ ५७ ॥

जनितमनुजपालीयातने पूतने ! त्वं
बहुशिशुजनहत्यादक्षतां शिक्षितासि ।
प्रकटय निजविद्यामद्य मद्याचिताया-
स्तव भुवनतलेऽस्मिन् मान्यता का बतान्या ॥ ५८ ॥

सर्वेषु च गर्वायमाणेषु निजं निजं व्यवसितं निवेदयत्सु दानवेषु पूतनापि विकृतं विहस्य विज्ञापयामास-

एशा कोशप्पलित्ता शअळमहिअळे शंचळिश्शं कळिश्शं
णिश्शेशाणं शिशूणं णळवळ ! तळशा पीळणं माळणं च ।
कीळिश्शं बाळपाळीलुळहिळशवशामंशभूशाणिवेशा
केके मं विक्कमंति विपुळकळवळं बाळिउं फाळयंति ॥ ५९ ॥

[एषा रोषप्रदीप्ता सकलमहीतले सञ्चरिष्यामि करिष्यामि
निःशेषाणां शिशूनां नरवर! तरसा पीडनं मारणं च ।
क्रीडिष्यामि बालपालीरुधिररसवसामांसभूषानिवेशा
के के मां विक्रमन्तीं विपुलकरबलां वारयितुं पारयन्ति ॥]

गमिश्शं महाळाअ! कज्जम्मि शज्जा
ळमिश्शं किशोळाण णिम्मूळणेण ।
विशज्जेहि मं पूअणं पूअणिज्जं
शवत्तं शमत्थं च दे शंहळिज्जं ॥ ६० ॥

[गमिष्यामि महाराज! कार्येषु सज्जा
रमिष्ये किशोराणां निर्मूलनेन ।
विसृज मां पूतनां पूजनीयां
सपत्नान् समस्तांश्च ते संहरिष्यामि ॥]

इति बहुविधं प्रतिज्ञाय प्रलम्बप्रधानाः सर्वजनभयङ्कराः लोकनिष्पीडनाय प्रारभन्ते स्म ॥

तस्मिन्नेव प्रभाते बहुविभवमहासौष्ठवे गोष्ठवाटे
पुत्रं नेत्राभिरामं निजकमकलयद्गाढमोदा यशोदा ।
नन्दश्चानन्ददुच्चैः शिशुतरुणजरन्मिश्रमश्रूणि हर्षा-
न्मुञ्चत् किञ्चैनमालोकत धृतकुतुकं गोपगोपीकदम्बम् ॥ ६० ॥

पुराभूतैः पुण्यैः परिणतमिदानीं व्रजपतेः
प्रसन्नं चामुष्मैं निहतमधुना नूनमधुना ।
अयं बालो बालामृतकरसनाभिर्यदभव-
च्चिरादस्य श्रीमानिति जनसमाज्ञेन जगदे ॥ ६१ ॥

स्तन्यं ददौ सापि मुदा यशोदा
स्तनन्धयायात्मतनूद्भवाय ।
तदा पिबन्नाशु तुतोष सोऽपि
प्रीत्यार्पितं किं न मुदे मुरारेः ॥ ६३ ॥

कनकखचितशृङ्गीरर्पयामास धेनू-
रविकलकुलजेभ्यो भूसुरेभ्यः सहस्रम् ।
मणिरजतहिरण्यच्छत्रवस्त्राणि च द्रा-
गभि ... ... ॥

[इतः परं द्वितीयस्तबकसमाप्तिं यावद् ग्रन्थो मतृकायां न विद्यते]

अथ तृतीयः स्तबकः ।

प्रातः स्वप्नजमग्रजं निजमनामन्त्र्यैव कैश्चिद् वृतो
बालैराशु विधाय कृत्यमुचितं प्राह्णेतनं जातुचित् ।
केळिं काळियसर्पदर्पशमनीं निश्चित्य तस्मिन् दिने
काळिन्दीतटमाप काळजलदश्यामोऽथ दामोदरः ॥ १ ॥

पुळिन्दवरसुन्दरीपुळकितोरुवक्षोरुह-
प्रगाढपरिपीडनप्रथितसौभगोत्सेकिभिः ।
कळिन्दतनयातटीविटपिवाटसञ्चारिभिः
प्रगे हरिरसेव्यत भ्रमरसारुतैर्मारुतैः ॥ २ ॥

ईक्षामास कराळकाळियमहाकाकोळवह्निच्छटा-
दूरप्लोषिततीरपादपलतावृन्दां कळिन्दात्मजाम् ।
रूक्षाम्भःपरिपानमूर्च्छितपतत्पान्थाण्डजश्वापदा-
मवम्भूतमहापदां पदमथो कृष्णः कृपावारिधिः ॥ ३ ॥

तत्र च समये क्रमशः क्रमश-
स्तरुणिमभाजस्तरणेः किरणै-
स्तप्ततयाथ नखम्पचपांसुनि
तरणिसुतातटसीमनि विपिने
काळियविषमविषानलदग्धे
कलितोज्ज्वलमृगतृष्णास्निग्धे
सञ्चरमाणं चरणैरतिभृश-
दवथुविसंस्थुलविनिवेशैस्तत्
पशुशिशुकानां शिशुपशुपानां
पान्थजनानाञ्चान्यजनानां
वृन्दमशेषमुदन्यदवाप
कळिन्दसुताया विषधरविषभर-
कलिलं सलिलम् कलुषं परुषम् ।
तत्र च केचन सम्नुः सलिले
तत् पपुरपर पशुशिशुसङ्घाः
मुमुहुः केचन तटभुवि दृढमथ
लुलुठुः केचन रुरुदुः केचन
ववमुः रक्तं वदनश्वभ्रैः
सर्वाङ्गीणविषानलशिखया
निर्वासिततमजीवाः शिव! शिव!
सर्वे मृतिमुपयाता भगवति
सर्वेशितरि समीपनिषण्णे ॥

कारुण्यामृतसारसान्द्रशिशिरैः स्निग्धैः कटाक्षाम्बुभिः
सिञ्चन् किञ्चन चञ्चलभ्रुकुटिकाकल्लोलमालाञ्चितैः ।
मुग्धालोकमुखेन्दुमन्दहसितस्यन्देन सन्दानितैः
सर्वांस्तान् समजीजिवद् द्रुततरं कृष्णाम्बुवाहस्तदा ॥ ४ ॥

सुप्तोत्थिता इव पुनर्नवजीवबन्धै-
रत्युल्बणद्युतिभरैः सुभगाः शरीरैः ।
गोगोपबालततयो विततप्रमोदा
गोपालबालवपुषं हरिमभ्यनन्दन् ॥ ५ ॥

तीरस्थं सूरजायास्तदनु विषशिखिज्वालशुष्कं कदम्बं
धीरस्तं प्रारुरोह प्रचुरघनरुचा भासुरो वासुदेवः ।
चित्रं पत्रैः फलौघैरविरळमुकुळप्रस्फुरत्पुष्पजालै-
र्निष्पन्नश्रीस्तदानीमजनि स विटपी नूतनस्फीतशाखः ॥ ६ ॥

नीपाग्राद् द्रुतमुत्पतन् पतगवत् क्रोशावकाशं नभो
लङ्घित्वा लघु निष्पपात यमुनातोये स मायाशिशुः ।
तुङ्गैरञ्जनशैलशृङ्गशतवच्चङ्क्रत्तरङ्गोत्करै-
रारुन्धेव धनुश्शतेन यमुना तावत् फणीन्द्रह्रदम् ॥ ७ ॥

प्रसारिताभ्यां करपल्लवाभ्या-
मास्फोटयन्नम्बु तदम्बुजाक्षः ।
मृदङ्गतुङ्गेन तदुत्थितेन
ध्वानेन तं काळियमाह्वतेव ॥ ८ ॥

ततस्तावदम्भोधिमिव गम्भीरमारसातलावगाढप्रौढसलिल-
सङ्घातं महाह्रदमाश्रितिष्ठमातिगरिष्ठनिष्ठुरफणासहस्रमणिगणकिरणदूर-

निराकृतगुहान्धकारः सहस्राधिकसहचरीवर्गसमावृतः पुत्रमित्रसमूह-समासेवितः सुखविहरणविगामितरात्रिन्दिवः स कालियकाळाहिराजः तदम्भस्समास्फोटितध्वनितमाकर्ण्य घूर्णमानक्रोधपावकानुमिलितगरळ-पावकधूमधूम्रीकृतमुखचक्रवालः साट्टहासमिदमभाषिष्ट ।

कस्कोऽयं कालवह्नाविव परुषतरं काळियक्ष्वेळवह्ना-
वह्नाय स्वं हविष्ट्वं गमयितुमधुनोत्कण्ठते कुण्ठचेताः ।
व्याळीवर्गस्य यो मे रहसि विहरणप्रौढरङ्गे तरङ्गे
काळिन्द्याः केळिमिच्छत्यहह! महदहो! साहसं मोहराशेः ॥ ९ ॥

पुरन्दरो वाथ पुरञ्जयो वा
मुरं द्विषन् वा किमुतान्यवर्गः ।
यो वास्तु को वास्तु विषानले मे
सद्यः प्रपद्येत स भस्मभूयम् ॥ १० ॥

दंक्ष्यामि दन्दशूकोऽहमेनं मर्मसु मर्मसु ।
दस्त्रावपि न पर्याप्तावस्मिञ्जाङ्गलिकायितुम् ॥ ११ ॥

अस्मभ्यं द्रोग्धुमस्मिन् प्रभवति भुवने केवलं वैनतेयो
यः सोऽप्येतं प्रदेशं नहि विशति मुनेः सौभरेः शापहेतोः ।
तद् भोः! कस्माद् बिभीमो वयममितमहावीर्यकाकोळशस्त्राः
कस्त्राता काळियाहेरभिमुखपतितस्यास्य दास्याः सुतस्य ॥ १२ ॥

इअ भणिअ फणीसरो सरोसो
सअमुवरिप्पवणेण वारिपूरे ।
विअडफणसहस्सतुंगसिंगो
पअळइ जंगमसेळसंणिआसो ॥ १३ ॥

[इति भणित्वा फणीश्वरः सरोषः
स्वयमुपरिप्लवनेन वारिपूरे ।
विशदफणसहस्रतुङ्गशृङ्गः
प्राचलद् जङ्गमशैलसन्निकाशः ॥]

उपससर्प स सर्पवरो हरिं
वपुरमुष्य पदादिशिखावधि ।
दृढमवेष्टत मर्मसु मर्मसु
स्वदशनैरशनैरदशच्च तत् ॥ १४ ॥

कायः प्रायः क्रीडनार्थं गृहीतो
धृष्णोर्विष्णोर्दारुवच्चारुरूपः ।
तस्मिन्दष्टे वेष्टिते वा व्यथा का
ऽभिन्नस्यात्मज्योतिषस्सर्वतोऽपि ॥ १५ ॥

तत्र चावसरे तावदशुभलक्षणनिरीक्षणादतिविवशचित्तावत्याहितमात्मजस्याशङ्कमानौ यशोदानन्दगोपावन्ये च गोकुलवासिनो गोपगोपीजनाः सबालयुवजरठप्रायाः सर्वेऽपि ससम्भ्रमप्रचारस्खलितचरणविह्वला विदितविश्वविशेषेणापि शेषेण भगवता गदाग्रजाग्रजेन बलभद्रेणावलम्बितमनुजमुद्रेण प्रदर्शिताध्वानः सत्वरातिक्रान्तकान्तारसरिदचलसानवः साक्रन्दाः कालिन्दनन्दिनीतटमाढौकिषत । तेषु च तथाभूतविषमविषवीतिहोत्रविस्फुलिङ्गोत्करविकटस्फटाचक्रविषधरशरीरावेष्टितसर्वावयवं सनातनमपि संशयितजीवितमिवावलोक्य गोपालबालं 'हा कृष्ण! हा कृपानिष्णातमानस! हा गोकुलकलशार्णवपूर्णचन्द्र! किमेवंविधदुरवस्थामास्थितोऽसि। कृतं कृतमनया कृतकक्रीडया । सर्वानिमानननाथीकर्तुं किमुपक्रमसे । विषधरपाशपाशबन्धमवधूयास्मान्

उज्जीवयोज्जीवये’ति विविधं विलपत्सु हलधरेण विनिवारितेष्वपि वारिनिपतनेन प्राणानुज्झितुमुद्युञ्जानेषु नन्दगोपप्रमुखेषु मुक्तकण्ठ-माक्रन्दत्सु,

आधून्वन्नङ्गमङ्गं नयनकुवलये किञ्चिदुन्मील्य चारु-
स्मेरं वक्त्रारविन्दं निजमुदनमयन्नन्दजो मन्दमन्दम् ।
पाणिद्वन्द्वेन शोणाम्बुजदलमृदुलेनोत्कटं पीडयित्वा
हत्वा चैनं भुजङ्गं दिनकरदुहितुस्तीरमभ्यारुरोह ॥ १६ ॥

खिण्णं णं पण्णइंदं खिदिअळतळिमे णिद्दअं मद्दएउं
खिप्पंतो खिप्पमुत्ताणिअविअडफणाचक्कवाळेक्करङ्गम् ।
वीरो पारोहमाणो मणिपडळमहादीवसाहस्सदिप्पे
तत्थ प्पत्थावअंतो णडणविहरणं रेहए माहवोसो ॥ १७ ॥

[खिन्नमेतं पन्नगेन्द्रं क्षितितलतलिमे निर्दयं मर्दयितुं
क्षिपन् क्षिप्रमुत्तानिताविशदफणाचक्रवाळैकरङ्गम् ।
वीरः प्ररोहन् मणिपटलमहादीपसाहस्रदीप्रे
तत्र प्रस्तावयन् नटनविहरणमराजत माधवोऽसौ ॥]

झलज्झलितनूपुरं चलितकिङ्किणीकङ्कण-
च्छटाकलकलोन्मिलन्मुरलिकारवाघोषितम् ।
अराळघनकुन्तळीशिथिलकेकिपिञ्छाञ्चलं
व्यराजदहिमस्तके मुरजितः शिशोस्ताण्डवम् ॥ १८ ॥

प्रस्फुटिताग्रप्रगळितरक्तप्रव्रणतफणिपतिफणगणशृङ्गं
प्रस्रवणाभप्रसृमरचर्मद्रवरसयुतसरिदतनुतरङ्गम् ।
प्रक्षुभितान्तःश्वसनसमीरप्रचलिततटतलविटपिसमूहं
निर्दयमेवं समजनि काळियमर्दनविहरणमहह! मुरारेः ॥ १९ ॥

फणानां सहस्रेऽपि तुल्यं मुरारेः
पदाब्जद्वयं तत् पपातातिवेलम् ।
विचित्रं हि मित्रस्य पादाः सहस्रं
न तेऽप्येककालं त्रिलोक्यां पतन्ति ॥ २० ॥

गळनाळगळन्मृदुगीतरवं
कळवेणुरवेण समामिळितम् ।
ललितं नटनं रतिसङ्कटनं
कळगोपशिशोरजनिष्ट चिरम् ॥ २१ ॥

गंधव्वा गअणम्मि किण्णरवरा विज्जाहराणं गणा
णच्चंति प्फुडमच्छरा हि समअं सेच्छामिहोमच्छरा ।
पुप्फाइं पुण पुप्फमेहाणिवहा मुञ्चाति सिञ्चंति णं
णच्चंतं महुसूअणं णवसुहाविंदूहि वुंदारआ ॥ ॥ २२ ॥

[गन्धर्वा गगने किन्नरवरा विद्याधराणां गणा
अनृत्यन् स्फुटमत्सरा हि समदं स्वेच्छा मिथोमत्सराः ।
पुष्पाणि पुनः पुष्पमेघानिवहा अमुञ्चन् असिञ्चन् एनं
नृत्यन्तं मधुसूदनं नवसुधाविन्दुभिर्वृन्दारकाः ॥]

इत्थमतिचिरप्रवृत्तताण्डवोपधिकदण्डप्रकारेणाण्डजप्रवरमदभरपरिखण्डनप्रचण्डप्रक्रमं चक्रपाणिमुपगम्य सम्यगवनतिप्रशिथिलकेशपाशविगळितसुरतरुप्रसूनप्रकल्पितार्चनाविधय इत्यातिभूमिगतशोकावेशपरवशा निरन्तरनिर्गलद्बाष्पजलकर्दमितकाळिंदजापुलिनभूमयः काळियकुटुम्बिनीजना जनार्दनमस्तोकसम्भ्रममस्तोषत ।

विश्वेशाय नमो नमोऽस्तु भवते विष्णो! न धृष्णोति ते
सोढुं मा भवतः पदस्त्रिभुवनं यद्धन्त! सन्ताडनम् ।
भर्ता नः स्वयमागसामविकलं कर्तापि मर्ता यथा
नासौ नाथ! तथा प्रसीदतुतरामार्तानुकम्पी भवान् ॥ २३ ॥

तणावत्तो णाअं णहु सअमहो णावि अ बको
घिणावंतो संतो किमु हणसि णाअं बहुतणम् ।
इमं मंतुं खंतुं पसिअ पसुकप्पस्स फणिणो
अभव्वं वेहव्वं कुणउ फणिणीणं पि ण भवम् ॥ २४ ॥

[तृणावर्तो नायं न खलु शतमखो नापि च बको
घृणावान् सन् किमु हंसि नागं बहुतृणम् ।
इमं मन्तुं क्षन्तुं प्रसीद पशुकल्पस्य फणिनः
अभव्यं वैधव्यं करोतु फणिनीनामपि न भवान् ॥]

इति तासां गिरः श्रुत्वा मुदितो मधुसूदनः ।
काळियस्य फणाचक्रात् कृपानिधिरवातरत् ॥ २५ ॥

विषमविह्वलविवलितविभुग्नमग्नमणिगणमस्तकस्रस्तकङ्कट-निर्मोकः सत्वरं कथञ्चिदुत्थाय कलितप्रदक्षिणः साष्टाङ्गपातं मुहुर्मुहुः प्रणम्य 'प्रसीद भगवन्! प्रसीद, मम तावदज्ञानोपज्ञमिदमागो ममतावता भवता प्रसोढव्य'मित्यकृत्यकरणमात्मनोऽनुचिन्त्य व्रीळितः काळियोऽन्यदपि बहु दीनदीनाक्षरमाचचक्षे ।

हरिरपि तमावादीत्—

भो भोः काळिय! दूषितास्तव विषैः सूर्यात्मजाया इमा
आपो लोभवतोऽर्थसम्पद इव ध्वस्तोपयोगा नृणाम् ।
तस्मात् पुत्रकळत्रमित्रसहितः कुत्रापि गच्छेद् भवा-
नस्मादस्मदपोहिताखिलजनक्लेशात् प्रदेशान्तरात् ॥ २६ ॥

कुत्राहं देव! कुर्वे वसतिमसति तेऽनुग्रहे निग्रहीता
पत्रीशो मां गरुत्मानिह विहतगतिः सौभरेः शापतोऽसौ ।
अस्ति द्वीपः समुद्रे रमणक इति यः सार्थसंज्ञस्तमेनं
गत्वा वर्तस्व न त्वां मम वचनकरं बाधिता वैनतेयः ॥ २७ ॥

मत्पदलाञ्छनमेतन्मस्तकनिकरे निरीक्षमाणस्ते ।
दासवदेष भवन्तं नन्ता सप्रश्रयं गरुडः ॥ २८ ॥

इति भगवदनुज्ञानुगृहीते महान् प्रसाद इति प्रहर्षुलचेतसि प्रस्थातुमुपक्रममाणे सन्नताशिरसि पन्नगराजे तदन्तःपुराणि पन्नगीकुलानि तावदनर्घतरनागहारादिनानादिव्यद्रव्यसञ्चयैरुपहारीकृतैरुपेन्द्रमेनमुपगम्य प्रसादयामासुरेतैश्च प्रसाधयामासुः ॥

किञ्च,

व्याळीभिः साकमाळीभिः केळीभिरभिलाळितम् ।
काळियं नागमन्वीयुः सन्नताः पन्नगस्त्रियः ॥ २९ ॥

रन्तुं योग्यानि भोग्यान्यमलजलफलप्रायवस्तूनि यस्मिन्
सन्तीत्यन्वर्थसंज्ञं कमपि रमणकं द्वीपमम्भोधिमध्ये ।
सम्प्राप्तः सम्प्रहृष्टः स खलु फणिपतिः काळियः केळियत्तैः
साकं नागाङ्गनानामरमत निकरैः श्रीधराङ्घ्र्योरधीयन् ॥ ३० ॥

ततश्च कालोन्मथितकाळियवदनकुहरसहस्रपरिस्रुतरुधिरधोरणीमनुकुर्वद्भिरिव नवोन्मिषितजपाकुसुमपटलपाटलैः किरणनिकुरुम्बैरम्बरतलादवतीर्यास्तगिरिमरतकमलङ्कुर्वति भगवति गभस्तिमालिनि, तद्विरहशोकादिव मुकुलितपुण्डरीकमुखीषु पुण्डरीकिणीषु, तमस्समाह्वयसख्येन स्वर्भानोः प्रियश्चिकीर्षुभिरिव सहस्रभानुमभिबुभूषुभिस्तमोभिरभितः समाच्छाद्यमानेषु हरिन्मुखेषु, तत्क्षणविघटमानचक्रवाकमिथुनक्रेङ्काररूपसमाक्रन्दनसमाकर्णनजनितकरुणरसातिरेकादिव मकरन्दनिष्यन्दच्छलेनाश्रुधारामुन्मुञ्चन्ति कुमुदनयनानि किञ्चिदुन्मीलयन्तीषु कुमुदिनीषु, चञ्चुपुटसमाहृतकृमिकीटेषु नीडद्रुमकोटरनिलीनशावककुलकुक्षिसन्तर्पणसत्वरेषु पत्रिसमूहेषु, समन्ततोऽन्धकारितहरिदन्तरे सन्ध्यावसानसमये समुपस्थिते, स खलु नन्द-

सूनुर्नन्दगोपमग्रजं च रौहिणेयमम्बां च यशोदामभिगम्य प्रणम्य च प्रहर्षवशंवदैरमीभिरानन्दाश्रुभिरभिषेचमभिषेचमाश्लिष्यमाणः सादरमिदमुदाजहार –

मातस्तात! महद्भिरन्धतमसैरन्धीकृते कानने
पन्था हन्त! न गोष्ठवाटगमको विज्ञैरपि ज्ञायते ।
स्वप्स्यामो वयमत्र मूलकफलप्रायाशनाः साम्प्रतं
गन्तास्मश्च परेद्यवि स्वभवनान्येव प्रभातागमे ॥ ३१ ॥

इत्थं तत्थ सअंति जाव पसुवा णंदादिणो णंदिआ
इद्धो दावदवाणळो बहुसिहाढज्झंतजंतुद्दुमो ।
संपत्तो परिदो दिसं णिअजणं बाहेइ जाहे हरी
ताहे तं पिबइ ह्म कुंभअमुणी अंभोणिहाणं जहा ॥ ३२ ॥

[इत्थं तत्र स्वपन्ति यावत् पशुपा नन्दादयो नन्दिता
इद्धो दावदवानलो बहुशिखादह्यमानजन्तुद्रुमः ।
सम्प्राप्तः परितो दिशं निजजनमबाधत यदा हरि-
स्तदा तं पिबति स्म कुम्भजमुनिरम्भोनिधानं यथा ॥]

प्रातस्तरां प्रबुधितैः सममात्मवृन्दै-
र्नन्दात्मजो निजमगाहत गोष्ठवाटम् ।
गोपाङ्गनानयनभृङ्गनिपीयमान-
श्रीपादपद्मयुगळीमकरन्दबिन्दुः ॥ ३३ ॥

कदाचन मुदा हरिर्व्रजपदादभिप्रस्थितः
स दानवनिषूदनः सबलबालगोवत्सकः ।
विवेश विपिनं महत् कुहचिदत्र भाण्डीरको
विशालविटपो वटस्तटममुष्य चाहिण्डत ॥ ३४ ॥

क्रीडन्तं तत्र कृष्णं कृतकरणसमारम्भिणं डिम्भवृन्दै-
र्दृष्ट्वा दुष्टः सुरारिः सहजकुहनया सावलम्बः प्रलम्बः ।
निश्चिन्वानो निगूढं कपटशिशुममुं हिंसितुं कंसभृत्यो
गोपायन्नात्मचिह्नं पशुपशिशुकुलं प्राप गोपायमानः ॥ ३५ ॥

विवेद कुहनागोपः कुहनागोपमागतम् ।
तस्करस्तस्करं वेत्तीत्युक्तिः सत्या किलाजनि ॥ ३६ ॥

तत्र च कृत्रिमसङ्गरप्रसङ्गे 'यो येन जीयते स तं जेतारमंसे वहन् भाण्डीरकवटं त्रिः प्रदक्षिणीकुरुता'मिति कृतसमयपूर्वकं बलभद्रप्रधान एको वर्गो वासुभद्रप्रधानश्चापरो वर्ग इति पङ्क्तिद्वयेनावस्थिताः परस्परममर्षं विनाप्याह्वयन्तो विकत्थमाना विहसन्त उत्पतन्तो मण्डलेन प्रवल्गन्तश्चेति विविधयुद्धचारीक्रमेण सन्नद्धा अभीरव आभीरकुमाराः तलातलि मुष्टामुष्टि बाहाबाहवीत्यादिसर्वप्रकारेण सङ्ग्रामयाम्बभूवुः ॥

श्रीकान्तः सह युयुधे क्रुधा विनैव
श्रीदाम्ना स्वयमथ गोपबालकेन ।
पूर्वोक्तः समितिजितः परोक्तमंसे
बिभ्राणो वटमभितस्त्रिरभ्रमीच्च ॥ ३७ ॥

प्रलम्बश्चाचिन्तज्झटिति घटमानो हलभृता
जितश्चानेनाहं गलभुवि वहन्नेनमहितम् ।
इतो दूरं नीत्वा सपदि विनिहन्मि प्रथमत-
स्ततः कृष्णं तद्वत्तमपि च बकाघद्रुहमिति ॥ ३८ ॥

यथाचिन्तितं कर्तुमिच्छन् स जाल्मो
बलेनाहवे निर्जितश्चैनमंसे ।

वहन्नेव दूरं पलायिष्ट दुष्टो
हतश्च स्वयं मुष्टिघातेन तेन ॥ ३९ ॥

प्रलम्बघ्नं कृष्णः सपदि बलभद्रं प्रमुदितः
समाश्लिक्षन्नम्रः सकलगुणकम्रः सकुतुकम् ।
सुराणां प्रीतानां सुरविटपिपुष्पैः सुमहितौ
हितौ तौ गोपेभ्यो हरिहलधरौ रेजतुरुभौ ॥ ४० ॥

प्रलम्बवधसम्भूतविलम्बागतयोस्तयोः ।
धेनवस्तावदैषीकं नाम काननमासदन् ॥ ४१ ॥

उम्हेणं गिम्हजेणं विरळतरुउळे तत्थ संतत्तगत्ता
गोत्ता गत्तूण जाहे विइणइ विविणे साणुगो वासुदेओ ।
ताहे तं मुंजपुंजावुदमडवितडं दक्खिअं दुक्खवेसं
पच्छा दावग्गिळग्गं जह पळअमहावह्निगह्निज्जमाणम् ॥४२॥

[ऊष्मणां ग्रीष्मजानां विरळतरुकुले तत्र सन्तप्तगात्राः
गोप्ता गत्वा यदा विचिनोति विपिने सानुगो वासुदेवः ।
तदा तं मुञ्जपुञ्जावृतमटवितटं दृष्टं दुःखवेशं
पश्चाद्दावाग्निलग्नं यथा प्रलयमहावह्निगृह्यमाणम् ॥]

तेन च समन्ततो मुञ्जाटवीसञ्जातेन सञ्ज्वलता महता बहलधूम्याप्रवाहग्रस्तसमस्तपशुपशिशुपशुवर्गनेत्रमरीचिप्रसरेण दावाग्निना प्रबाध्यमानेषु हा राम! हा कृष्ण! परित्रायेथां परित्रायेथामस्मानाकस्मिकापतितादस्माद् भस्मावशेषीकृतजन्तुसमूहान्महानलादित्याक्रन्दत्स्वात्मवृन्देषु सस्मितमुखारविन्दो मुकुन्दः सान्तर्हासमिदमभिदधाति स्म—

निमील्य नेत्राणि निषीदत क्षणं
जहीत भीतिं पशुपालबालकाः! ।
अमी निशम्येदमुदीरितं हरे-
रमीमिलन्नक्षिपुटानि तत्क्षणम् ॥ ४३ ॥

दहनममुमैन्द्रजालिकदर्शितमिव दानवेन केनापि ।
मायाकृतं व्यनीनशदहितश्चैनं हरिर्मायी ॥ ४४ ॥

उन्मीलिताक्षा गोपाला नेक्षामासुर्दवानलम् ।
अहो! माया तवेत्येनमस्तुवन्नम्बुजेक्षणम् ॥ ४५ ॥

सोष्माणं ग्रीष्मकालं सवितृकरसमापीतसर्वोदकत्वा-
दाशुष्काशेषवीरुत्तरुतृणधरणीमण्डलं चण्डचण्डम् ।
शीतैः कल्लोलवातैरतिसुभगतरे यामुने तीरभागे
वीतायासं निनाय प्रियसखसहितो लीलया बालगोपः ॥ ४६ ॥

गम्भीराम्भोदतारध्वनितजनितया यत्र चित्रैः शिखण्डैः
प्रीत्या नृत्यन्ति केकारवमुखरमुखाः कानने नीलकण्ठाः ।
हर्षात् तां वर्षवेलामगमयदगरन्ध्रेषु रोहच्छिलीन्ध्रे-
ष्वृद्यद्विद्युद्विलासां विविधविहरणानन्दितो नन्दसूनुः ॥ ४७ ॥

तत्क्षणोन्मिषितसान्द्रचन्द्रिका-
हासभासुरसुधाकरानना ।
कामिनीव कलितामलाम्बरा
तावदाविरभवत्तरां शरत् ॥ ४८ ॥

स्वच्छाम्भस्सु सरस्सु कच्छविलसत्काशेषु कोशेषु च
व्याकोचेषु सरोरुहामधिगताशंसेषु हंसेषु च ।

शुभ्रेष्वभ्रचयेषु निर्मलशशिज्योत्स्नासु कृत्स्नासु च
प्रायो रात्रिषु शारदी किमपरं कुर्याद् विभूतिः शुभम् ॥४९॥

भास्करः स्वकरशोधनीशतै-
रम्बराङ्कणतलान्यमीमृजत् ।
तद्भवावकरविभ्रमं दधु-
र्जर्जरा जलमुचः क्वचित् क्वचित् ॥ ५० ॥

दारिताम्बुदिरहस्तिमस्तका-
न्निस्सृतैरुडुकदम्बमौक्तिकैः ।
व्योमभूमिधरमास्तृणात् क्षणा-
दृद्धशक्तिर्ऋतुवीरकेसरी ॥५१॥

शरदि परितः संसृप्तायां शशाङ्कमरीचिभि -
र्विशदपुलिने रात्रौ रात्रौ कलिन्दसुतातटे ।
तरळमुरळीनाळीनिर्यन्मनोज्ञरवामृतैः
सुरनरमुनीनभ्यासिञ्चन्नरंस्त चिरं हरिः ॥५२॥

आपायामृतपायमायतदृशो गोपालरूपामृतं
गोपालप्रमदा मदादिव दिवारात्रं विमूढाशयाः ।
आपादं पुनराशिखं च सततं सञ्चिन्त्य सञ्चिन्त्य तं
तापादङ्गजबाणपावकभुवो भेजुर्न कां कां दशाम् ॥५३॥

पच्चूसम्मि खु वच्छपाळणकिदे णिच्चं वणब्भंतरं
वच्चंतं ण सहंति वच्छळमिमं कण्हं मिअच्छीअणा ।
जंतं ता अणुजंति संतदमिमा णेत्तेहि चित्तेहि वा
गत्तेहिं णवरं ठिआ णिअघरे पासाणपुत्तेहि व ॥ ५४ ॥

[प्रत्यूषे खलु वत्सपालनकृते नित्यं वनाभ्यन्तरं
व्रजन्तं नासहन्त वत्सलमिमं कृष्णं मृगाक्षीजनाः ।
यान्तं ता अन्वयुः सन्ततमिमा नेत्रैश्चित्तैर्वा
गात्रैः केवलं स्थिता निजगृहे पाषाणपुत्रैरिव ॥

आश्लिक्षाम तमालनीलममलश्रीकं तदीयं वपु-
र्वंशीभुक्तरसामपाम मधुरामस्याधराख्यां सुधाम् ।
अस्यापाङ्गतरङ्गसङ्गशिशिराण्यङ्गान्यवाक्ष्माथवा
कामप्रेमवशादिति स्म कलिताशंसा भवन्ति स्त्रियः ॥ ५५ ॥

ततश्च तद्गतानुरागपरतन्त्रान्तःकरणाः सन्ततं तमेवानुचिन्तयन्त्यस्तद्वल्लभापदसाम्राज्यमनुभवितुमतितरामभिलषन्त्यस्तावदाभीरसीमन्तिन्यः सीमातिशायिकरुणामयमूर्त्या सर्वजनार्त्याधिविनाशिनीं कात्यायनीमात्तादरमाराध्य स्वार्थसार्थसंसिद्ध्यर्थमध्यवस्यमानाः कदाचन दिनजनुषि दिनकरतनयायाः सरिद्वरायास्तटतलमभिगम्य सम्यगम्बिकायाः सिकतामयं बिम्बमारचयन्त्योऽम्बुसमीपे प्रतिष्ठाप्य अभिषिच्य च जलगन्धकुसुमधूपदीपादिभिरुपचर्याभिरुपचरन्त्यस्तन्नामान्युच्चारयन्त्यः प्रदक्षिणयन्त्यो नमस्कुर्वत्यश्च सत्यः 'सत्यसन्धे! भगवति! समस्तजनशरण्ये! शरणमसि । करुणाशालिनि! शूलिनि! स्ववशीकृतकपालिनि लोकपालिनि! गोपालसुन्दरस्य नन्दगोपनन्दनस्य चन्दनशिशिरशीलस्य चन्द्रवदनस्य तस्य चरणदास्यो यथा स्याम वयं तथा प्रसीदे'त्यभ्यर्थयमाना मासमात्रमुपवासव्रतेनाराधयामासुः ।

कात्यायन्यपि वरमग्रजस्य विष्णो-
र्मूर्त्यात्र प्रकटितया दिदेश ताभ्यः ।
आर्त्यादेरवशजनस्य नाशयित्र्या
कीर्त्या यो विलसति तं चचक्षिरे ताः ॥ ५६ ॥

व्रीळावत्योऽपि सत्यः किमपि कमलजावल्लभे दुर्लभेऽपि
प्रत्यक्षे वीक्षिते ताः स्मरपरवशतामञ्जसा व्यञ्जयन्त्यः ।
तत्रातिष्ठन्त तस्मै क्षणमथ गतवत्यन्यतः क्वापि तस्मिन्
काळिन्दीवारिकेळौ सकुतुकमुदतिष्ठन्त गोष्ठाम्बुजाक्ष्यः ॥ ५७ ॥

परिधारितानि वसनानि तानि ता
वनिता नितान्तजनितान्तरादराः ।
तटसीम्नि तत्र विनिधाय यामुनं
तरसाघनाशनमघाक्षतोदकम् ॥ ५८ ॥

अमाङ्क्षुः काप्यन्तस्सलिलमुदमाङ्क्षुश्च परतः
कराग्रैरास्फोटं विदधुरुदभारे घनरवम् ।
प्रमग्ना निर्यान्तीर्निभृतमनुजग्मुश्च कतिचि-
द्विचित्रास्तत्रामूरकृषत मृगाक्ष्योऽम्बुविहृतीः ॥ ५९ ॥

निभृतमुपगम्य निर्मलान्यपि सङ्क्रान्तकुचकुङ्कुमपङ्कतया सरागाणि तासां मनांसीव तासां वासांसि वासुदेवः समाहृत्य समुन्नतं कमपि तटविटपिनम् आरुह्य तद्विटपकदम्बाविलम्बितानि तानि विधाय मुरळिकामापूरयन्नापूरितहिताभिलाषो विलासोचितमधुरवेषः सपरितोषः कृतवसनप्रमोषः सलज्जीकृतसकलगोपयोषः सोपहासमधुरभाषस्तत्र जोषमासाञ्चक्रे शक्रसगर्भ्यश्चक्रायुधः ॥

स्तेयं बाल! वदन्ति हेयमखिलैस्तत्रापि वस्त्राहृतिः
स्त्रीणां प्राणसमस्य ते किमुचिता धर्मात्मनश्छद्मना ।
वस्त्राणि प्रतिपादयस्व तरसा संवस्त्रय स्त्रीरिमा-
श्चोराद्रक्षितुरेव चौर्यमयि ते शौरे! महद् दूषणम् ॥ ६० ॥

स्त्रीणामम्बरमम्बरीकृतवता पीताम्बरेण त्वया
कष्टं गोकुलमाकुलीकृतमिति श्रुत्वेदमत्याहितम् ।
सर्वस्त्वामवगास्यति क्षितितले नो केवलं दुर्जनः
सोत्प्रासं खलु सज्जनोऽपि तदिदं सञ्चिन्त्य लज्जामहे ॥ ६१ ॥

सुन्दरीणां वचः श्रुत्वा नन्दसूनुरभाषत ।
मन्दस्मितसुधास्यन्दसुन्दराननचन्द्रमाः ॥ ६२ ॥

नग्नो नोदकमाविशेदिति सतामुक्तीरनादृत्य य-
न्मग्नानामिह निस्त्रपा युवतयो! वस्त्रं विना वारिणि ।
पापं वो महदागतं बत! महातीर्थस्य सन्दूषणात्
प्रायश्चित्तममुष्य किञ्चिदधुना सञ्चिन्तितं ब्रूमहे ॥ ६३ ॥

पश्चात्तापपुरस्सरोऽञ्जलिपुटन्यासः कराम्भोजयो-
र्नम्रे मूर्धनि यः स एव सकलस्योज्ञासनः पाप्मनः ।
उत्तीर्णाः सलिलादुपान्तिकमितः संप्राप्य नः सादरं
याचध्वं वसनानि मूर्ध्नि मुकुली कृत्यैव हस्ताम्बुजे ॥ ६४ ॥

एवं कृते तु वस्त्राणां लाभो लोपश्च पाप्मनाम् ।
सिध्यत्युभयमद्यैव न सिध्यत्यन्यथोभयम् ॥ ६५ ॥

स्मितमधुरमुदारं वाक्यमाकर्ण्य शौरे-
र्नतवदनसरोजा लज्जया गोपयोषाः ।
मुकुलितकरपद्मा मूर्ध्नि मोमुह्यमानाः
कथमपि तरुमूलं प्रापुरुत्तीर्य तोयात् ॥ ६६ ॥

अपगतमेघावरणा दृश्यन्ते यत्र निर्मलाः ककुभः ।
शरदस्तस्या दर्शनमभिलषति प्रायशो लोकः ॥ ६७ ॥

इति तावन्मृदुहसितनिर्मलनर्मालापपूर्वकमम्बुजाक्षः साक्षात्कृतसकलावयवाभ्यस्ताभ्यो यथास्वं वसनानि प्रतिपादयन् प्रमोदमासामधिकतरमापादयन् पादपशिखरादवतीर्णः पूर्णेन्दुरिवाम्बरतलादर्णवार्णांसीव वरवर्णिनानां मनांस्युच्चैरुल्लोलयन्नुपलालयंश्च पुनरिदम् उदाजहार ॥

हेमन्तर्तुः सम्प्रति शिशिरर्तुरतस्ततो वसन्तऋतुः ।
तस्मिन्नस्मत्तो वः सेत्स्यन्त्यबला ! मनोरथाः सर्वे ॥ ६८ ॥

तत्र च,

प्रालेयावरणापनोदसुभगश्चन्द्रश्च सान्द्रप्रभो
मालेयानिललोलपल्लवलतापुञ्जाश्च कुञ्जालयाः ।
कालिन्दीपुलिनानि चोन्मदमिळद्भृङ्गालिसङ्गीतवन्नालीकोत्पलकैरवाणि वदितुं युक्तं वदिष्यन्ति वः ॥ ६९ ॥

वाणीमाकर्ण्य वेणीमिव वदनभुवं माधवस्यामृतस्य
श्रेणी शोणाधराणामधरितदिविषत्सुन्दरीसौभगानाम् ।
आनन्दाम्भोधिमग्ना इव दिव उपरिस्थानमाप्ता इवोच्चैः
स्वा मूर्तीरार्तिभङ्गादमनुत सुभगम्भावुकाः सिद्धसाध्याः ॥ ७० ॥

वसित्वा समादाय वस्त्राणि गोप्यो
हसित्वा मिथो वीक्ष्य मन्दाक्षमन्दाः ।
मुखेन्दौ मुकुन्दस्य सन्दानिताक्ष्यो
मुहुस्ताः समस्ता गृहान् स्वानवापुः ॥ ७१ ॥

गोष्ठं तावदुपेत्य गोपसुदृशां श्रेष्ठो हरिर्गोकुलश्रेष्ठं ज्येष्ठमवन्दतेष्टसुहृदां वृन्दैरनन्दच्च सः ।

अन्येद्युश्च समं कुमारनिवहैर्गोत्रापरित्रायको
वृन्दारण्यमतीत्य कञ्चन वनोद्देशं समासेदिवान् ॥ ७२ ।

छुहातह्नावेसक्खुहिअमहिअं बालणिवहं
मह दिक्खावंते महिसुरवरिट्ठे सुमहिए ।
विणा लज्जं भोज्जं विणअसहिआ जाचह लहुं
तणावत्ताराई सअमिअ भणंतो मुअइ णम् ॥ ७३ ॥

[क्षुधातृष्णावेशक्षुभितमधिकं बालनिवहं
मखे दीक्षावतो महीसुरवरिष्ठान् सुमहिते ।
विना लज्जां भोज्यं विनयसहिता याचध्वं लघु
तृणावर्तारातिः स्वयमिति भणन्नमुञ्चदेनम् ॥]

ते च कुमारकास्तथेत्यभिधाय प्रबलतराशनायोदन्यापारवश्याद्याचनदैन्यमप्यगणयन्तः सत्वरमुपेत्य प्रणमन्तोऽध्वरशालिकामध्यासीनानविकलसमुज्ज्वलदग्नित्रयसाक्षिकान् दीक्षितानात्मकुक्षिपरिरक्षणक्षममन्नपानमभ्यर्थयामासुः । अथ ते पुनरवनिदेवदीक्षिता वीक्षितानप्यवीक्षितफलकेनानादरेणावधीरयामासुः ॥

शूद्रेभ्योऽन्नं यजनसमये को नु दद्यान्निषिद्धं
सिद्धश्चेदं जगति हि जघन्यत्वमाभीरजातेः ।
ही ही ! मोहः पशुपशिशुकप्राकृतानां धिगित्थं
चित्ते कृत्वा क्षितिसुरवरास्तान्निरास्थं निरास्थन् ॥ ७४ ॥

निवृत्तास्ते खिन्ना निजसुहृदमासाद्य शिशवः
सतृष्णाः कृष्णं तं निजगदुरवज्ञां द्विजनुषाम् ।
अमीषां दारेभ्यो वदत मदभिप्रायमिति ता-
नुदित्वा भूयोऽपि व्यगमयदधीशः शिशुजनान् ॥ ७५ ॥

क्षिप्रं ते विप्रदारा निशमितनिखिलाधीश्वराज्ञाः सुविज्ञा
यज्ञायत्तानभक्तानभिलषितमनावेदयन्तः स्वभर्तॄन् ।
प्राज्यं साज्यञ्च भोज्यं दधिगुळकदळीपक्वदुग्धादियुक्तं
कृत्वा पात्रेषु धृत्वा शिरसि हरिमभिप्रस्थिता भक्तिभाजः ॥ ७६ ॥

काचन भर्तृनिरुद्धा
विप्रवधूः क्षिप्रमेव निजदेहम् ।
जहती महतीभक्ति-
र्मुक्तिमगान्मुरजिदङ्घ्रिकमलयुजम् ॥ ७६ ॥

भक्तप्रदा मुदा कृष्णो भुक्तान्नो विप्रवल्लभाः ।
अनुजग्राह तत्त्वज्ञांस्तद्भर्तॄनपि चाकरोत् ॥ ७७॥

इति श्र भागवतचम्पूप्रबन्धे
तृतीयः स्तबकः ॥

अथ चतुर्थः स्तबकः ।

गोत्रावृद्धिकरं कदाचन मुदा गोत्रारिसत्रं महत्
तत्रारभ्यत गोकुले निवसता वृन्देन नन्दादिना ।
यत्राज्यं समिधश्चपालचमसप्रायं च किञ्चापरं
पात्राणां प्रचयं च वस्तुनिचयं सञ्चिन्वते स्म प्रजाः ॥ १ ॥

तं च सञ्चितसमस्तयाज्ञियद्रव्यभव्यतरशालाजालरमणीयमननीयरसतमसुमहितसम्भारं समारम्भमाभीरमुख्यानामवलोक्य सकलसमीहितवेदी सन्नप्यविदन्निव नन्दसूनुर्नन्दगोपमिदमप्राक्षीत्, स चोत्तरमुदाजहार।

को वस्तात! समुद्यमः, सुत! वयं यज्ञार्थमुद्युञ्ज्महे,
कस्य प्रीतिकृदेष, सर्वजगतां मित्रस्य वृत्रद्रुहः।
प्रीतिः किंफलिकास्य, डिम्भ! महती वृष्टिर्महीमण्डले
तत्प्रीतिप्रभवा यतो वयममी गावश्च वर्धामहे॥ २॥

प्रस्तुतमैदंप्रथमिकमथवेदं सार्ववार्षिकं सत्रम्।
सत्रं वार्त्रघ्नमिदं वर्षे वर्षे सुत! क्रियते॥ ३॥

तत्प्रस्तावमाकर्ण्य सप्रहासमिदमाह स्म समस्तजनसमक्षमेव देवकीनन्दनः।

सत्यं तात! वयं हि गोगणधना गावश्च वृष्टिं विना
पुष्टिं नाश्नुवते भुवश्च किमियं वृष्टिस्तु सृष्टिर्हरेः।
यज्ञन्या भुवि वृष्टयः किमपि तज्ज्ञानाम्यदृष्टं परं
पर्जन्याह्वयमत्र वृत्रदमितुः का नाम भोः कर्तृता॥ ४॥

इष्टिर्वृष्टिफला किलास्तु महतीं यः पुष्टिमस्मादृशामाधत्ते सततं गवां च स गिरिर्गोवर्धनः केवलम्।
अस्मै पर्वतदैवताय यजनं सर्वात्मना कुर्वतामुर्वीनिर्वृतिभङ्गकारिदुरितक्षेपाय गोपालकाः॥ ५॥

अपि च,

अदृष्टं यद्वस्तु श्रुतिगमकमेतत्तदनघं
महीदेवाः साक्षान्निगमगिरि नित्यं पठितिनः ।
शिवो विष्णुर्ब्रह्मेत्यपि किमपि मूर्तित्रयमपि
द्विजन्मानस्तस्मान्महत महतस्तानपि मखैः ॥ ६ ॥

विप्रप्रीत्या क्षिप्रमेवात्र लोके
वृष्टिः पुष्टिस्तुष्टिराष्टिर्विमृष्टिः ।
कृष्टिर्भूमेः सस्यदा सर्वदा स्या-
दिष्टिस्तस्मादिष्यते ब्राह्मणेषु ॥ ७ ॥

सुणंता तं वाणिं समुइददमं संगधणुणो
सणंदा दे गोवा समहिअसमाणंदसुमुहा ।
समाढत्ता तत्तारिसविहवगोवड्ढणमहा-
महाघोसं तोसं मणसि वहमाणा बहुअरम् ॥ ८ ॥

[शृण्वन्तस्तां वाणीं समुचिततमां शार्ङ्गधन्वनः
सनन्दास्ते गोपाः समधिकसमानन्दसुमुखाः ।
समारब्धास्तत्तादृशविभवगोवर्धनमहा-
मखाघोषं तोषं मनसि वहन्तो बहुतरम् ॥]

गोपा गोवर्धनाद्रेरधितटमटवीभूतले वल्लशाला
गोपायन्तः समन्तान्मखविहतिकृतो हिंस्रसङ्घादजस्रम् ।
विज्ञानाहूय यज्ञं धरणिसुरवरान् कारयामासुराशु
श्रीकृष्णः शैलरूपी समजनि यजनस्यास्य भागस्य भोक्ता ॥ ९ ॥

हव्यसुगन्धिसमीरसमीरित-
धूमश्यामलिताम्बरमखिल-
द्रव्यसमृद्धमवर्धत यजनम्;

यजमानार्चितसच्चिन्मयमथ
गोवर्धनमिह गोवर्धनकर-
मापद्धरमरमध्वर्य्वादिक-
चातुर्होत्रसमध्याहिताहित-
कृत्यं; तत्र च पश्वालम्भे
विधिविहिते सत्यवादितपशवो
निहतवपादिनिजावयवा अपि
नवसम्भूतसमस्तशरीरा
दिवमधितिष्ठन्त्यद्भुतमद्भुतम्
अथ पुनरतिथीनभिनवजेमन-
तेमनदधिघृतपायसदुग्धैः
सहितान् महितान् वसुभिर्वसनैः
कनकाभरणोपानच्छत्रै-
श्चित्रदुकूलैश्चिरमाराध्य-
न्नध्यक्षास्ते पशुपश्रेष्ठा
गोष्ठापाश्रयगोष्ठीसाधव
इत्थं समजनि यजनमुदारम् ॥

रण्णम्मि गोवड्ढणबह्मजण्णे
पुण्णम्मि पुण्णम्मि अ वड्ढमाणे ।
जेट्ठेण णंदादिजणेहि साहं
गोट्ठं पविट्ठो रमइ ह्म कह्णो ॥ १० ।

[आरण्ये गोवर्धनब्रह्मयज्ञे
पुण्ये पुण्ये च वर्धमाने ।
ज्येष्ठेन नन्दादिजनैः साकं
गोष्ठं प्रविष्टो रमते स्म कृष्णः ॥]

श्रुत्वा चारणबन्दिवृन्दमुखतो वृन्दारकाधीश्वरो
वृत्तान्तं तमिमं नितान्तकुपितो रज्यत्सहस्रेक्षणः ।
वह्निप्रेतपयातुधानवरुणप्रष्ठान् दिशामीश्वरा-
नाहूयेदमवोचदुत्कटशिखिप्रज्वालवज्रायुधः ॥ ११ ॥

हंहो ! सिंहस्य नित्यप्रखरनखमुखोत्कृत्तमत्तेभकुम्भ-
स्रस्तं मस्तिष्कमस्तुं प्रसरति पुरतस्तस्य बालः सृगालः ।
कश्चिद् गोपालबालः किल मम विहितं यज्ञमाच्छिद्य मत्तः
कस्यापि स्थावरस्य व्यधित विधिरयं कुत्र दृष्टः श्रुतो वा ॥ १२ ॥

युक्ता वह्निमुखा मखांशमशितुं ये नाम देवा वयं
शक्तास्त्रातुमपास्तमर्त्यजनतातर्षेण वर्षेण गाम् ।
तानस्मानखिलाननादृतवतो डिम्भस्य डम्भोदयं
किं न स्तम्भयितुं प्रभूभवति नो दिव्यत्वमव्याहतम् ॥ १३ ॥

वज्राग्निस्फुरणप्रचण्डपवनव्याघातमेघावलि
व्याकीर्णाभिरितस्ततो भृशमपां धाराभिराराादिमाम् ।
आभीराधमवासभूमिमचिरादम्भोनिधिं कुर्महे
गोभी राजति याधुना सपदि सा नक्रैः समाक्रम्यताम् ॥ १४ ॥

इति सगर्वमभिधाय सर्वसुपर्वाधिनाथः पर्वतपक्षविक्षोददक्ष दक्षिणकरेण तत्क्षणं कुलिशमुद्वहन् मिहिकाचलशिखरशुभ्रमभ्रमातङ्ग-मधिरूढः प्रलयाभ्रकदम्बमाहूयाम्बुवर्षेण गोकुलं व्याकुलयितुमादिदेश। तदादितेयबलपरिवृतः स्वयमपि निश्चक्राम ॥

गम्भीरस्तनितप्रकम्पितभुवो दम्भोलिरोचिश्छटा-
शुम्भज्जम्भविरोधिकार्मुकमहस्सम्पर्कशारात्विषः ।

अम्भोदा रभसादुपर्युपरि तद् गोष्ठं नभोमण्डलं
सर्वत्र स्थगयाम्बभूवुरसितक्ष्माभृन्निभैर्वर्ष्मभिः ॥ १५ ॥

सज्जो गज्जंतविज्जुज्जलपळअघणुस्सिट्ठविट्ठिप्पणाळी-
झंकारुक्कंठमोरप्फुडणडणहळब्बोळपेरंतरण्णम् ।
ताळा वोळंतकूळंकससलिळणिमज्जंतनिस्सेसगेहं
दिट्ठं गोट्ठ पविट्ठं विअ जळहिजळे णट्ठसव्वत्थसत्थम् ॥ १६ ॥

[सद्यो गर्जद्विद्युज्जलप्रलयघनोत्सृष्टवृष्टिप्रणाळी-
झंकारोत्कण्ठमयूरस्फुटनटनकोलाहलपर्यन्तारण्यम् ।
तदा व्यतिक्रमत्कूलङ्कषसलिलनिमज्जन्निश्शेषगेहं
दृष्टं गोष्ठं प्रविष्टमिव जलधिजले नष्टसर्वार्थसार्थम् ॥]

अस्मान्मा स्म बिभीत गोकुलसदो ! धाराळवारागमा-
दस्मान् बाधितुमत्र वृत्रजिदयं जागर्ति जानीमहे ।
आरुन्ध्मो वयमेतमित्यभिदधद् गोवर्धनाद्रिं जवा-
दुद्धृत्याधृत वामपाणिकमले डिम्भः स विश्वम्भरः ॥ १७॥

पर्यन्तनिर्यदुदविन्दुचयच्छलेन
प्रालम्बिमौक्तिकसरस्य महाचलस्य ।
छत्रीयतो मरतकोपलदण्डकल्प-
श्रितीयते स्म खलु वामभुजो मुरारेः ॥ १८॥

उत्क्षिप्तस्य गिरेरधस्तनमहीभागः स गोष्ठव्रजो
विस्तीर्णो दशयोजनान्तरमितो निस्तोयबाधोऽभवत् ।
किश्चापाकृतखरघोरकिरणापातेन शीतोत्तरः
सञ्चारक्षमसैकतश्च समभूत् सर्वप्रियम्भावुकः ॥ १९ ॥

वामेन बिभ्रदचलं करपल्लवेन
प्राप्य स्थितं स्वमभितः समजं पशूनाम् ।
लेलिह्यमानममलं निजमङ्घ्रियुग्मं
कण्डूयति स्म शनकैरितरेण कृष्णः ॥ २० ॥

पर्वतपक्षच्छेदाद् गर्वितचेताः सुपर्वराजोऽयम् ।
पर्वतराजादेव स्वपक्षविच्छेदमनुभवतु ॥ २१ ॥

एवं सप्ताहमुत्तानितकरकमलाविद्धगोवर्धनाद्रि-
स्तस्थावस्तन्द्रमिन्द्रप्रचुरमदभरध्वंसकृद् वासुदेवः ।
बिभ्रन्त्यभ्राणि शुभ्रां द्युतिमति हि तमां वान्तसर्वोदकत्वा-
दाधूयन्ते स्म वातैस्त्वरितमत इतो निर्धनाः क्व ध्रियन्ते ॥२२॥

इति किलापसृतघनावरणतयातिविशदेषु हरिन्मुखेषु परितःस्फुरितदिनकरमरीचिनिकरगुरुतरप्रकाशेषु द्यावापृथिव्यवकाशेषु पृथिवीधरं करतलादवतार्य धरणितले यथापुरं प्रतिष्ठापयति गोष्ठपरित्राणाभिनिविष्टे विष्टरश्रवसि हृष्टचेतोभिर्यथायथमात्मसद्मसूपविष्टैर्गोपवरिष्ठैः सर्वोत्कृष्टचेष्टस्याष्टादशहायनस्याप्यस्य बालस्याद्भुतचरित्रचित्रीयमाणे रहसि पृष्टप्रभावस्तत्रभवान्नन्दगोपो गर्गमुनिनिर्गदितमनर्गळमस्य महिमानमेभ्यो निभृतमवबोधयामास । ततः प्रभृति चैषामस्मिन् सहस्रगुणाधिकविस्रम्भजृम्भिता बहुमतिरहर्निशमेधाम्बभूव ॥

तावद्देवाधिराजः शमितमदभरः सिद्धतत्त्वावबोधो
गत्वा तुष्टाव नत्वा नरकविजयिनं नाकिवर्गेण साकम् ।
सस्नेहं दिव्यगव्या स्वयमयमतनुप्रस्नुतैर्दुग्धपूरै-
र्मुग्धैः सिद्धाभिषेकः समजनि च हरिश्चारुगोविन्दनामा ॥ २३ ॥

योगार्थेन स गोविन्दो गामविन्ददिति स्फुटम् ।
गोशब्दस्य च येऽर्थाः स्युस्तन्मयोऽयमिति स्थितम् ॥ २४ ॥

शुण्डाग्रावटनिस्सृतैरिव शुभैः कुम्भस्थमुक्ताफलैः
शुभ्रैरभ्रमुवल्लभोपनमितैरभ्रापगाकारिभिः ।
बभ्राजे वलवैरिणा समभिषिक्ताङ्गो विहङ्गध्वजो
बिभ्राणः श्रियमञ्जनाक्षितिभृतः श्लिष्टस्य चन्द्रांशुभिः ॥ २५ ॥

मङ्गल्यैर्मधुसूदनाङ्गगळितैर्गङ्गाजलैः सङ्गता
तुङ्गश्रीरजनिष्ट गोष्ठवसुधा सर्वापि पूर्वाधिकम् ।
सर्वस्मादुपरि स्थितापि नगरी गीर्वाणराजो यया
दूरं तावदधःकृता तदुपरि ब्राह्मी च सा वासभूः ॥ २६ ॥

प्रणम्य गोविन्दममन्दभक्ति-
प्रणम्रमूर्धन्यमराधिनाथे ।
प्रमोदरूपामृतवारिराशौ
प्रमज्जति स्म व्रजवासिवृन्दम् ॥ २७ ॥

गते सति दिवं प्रति प्रमुदिते शचीवल्लभे
पिता किल जगत्पतेः स खलु नन्दगोपस्तदा ।
उपोष्य हरिवासरे पयसि यामुने द्वादशी-
दिने दिनकरोदये सपदि साधु सम्मग्नवान् ॥ २८ ॥

ततश्च वारुणेन केनचित् पुरुषेण तरसा रसातलं नीतः प्रमुदितचेतसा प्रचेतसा मुकुन्दमुखचन्द्रसन्दर्शनाभिलाषिणा साभिप्राय-मभिसत्कृतस्तत्र वसन्नपि पुत्रविरहसन्तापमन्दप्रकाशो नन्दगोपः कानिचिदहानि प्रणिनाय । गोकुले च तदनवलोकनशोकव्याकुले

जलोदरे जनपदेषु वनतलेषु च तं विचिन्वाने सति स भगवानवगतं-सकलभावो वासुदेवः स्वयमुपगम्य वरुणम् अरुणचरणारविन्दरेणुसम्पर्क-पवित्रितसमस्तोपभोगवतीं भोगवतीं नाम तत्पुरीमनुगृह्णन् प्रणमतः प्रसिद्धस्वाभिप्रायप्रहृष्टतमादस्मात् पश्चिमाशापतेः पाशिनः सकाशात् पितरमुपादाय सत्वरमात्मभवनमाढौकिष्ट ॥

संदाणंदेण णंदेण खु कहिदमिदो णिह्णुअं विह्णुभावं
पच्चक्खं दट्ठुकामो पदमवि हरिणो केवळं गोवळोओ ।
सट्ठादिट्ठाणपट्ठीकरणचणगुणं सुट्ठु संदासिओसो
सट्ठाणं तुट्ठिपुट्ठिप्पदमिदममुणा विट्ठवाहीसरेणं ॥ २९ ॥

[सान्द्रानन्देन नन्देन खलु कथितमितो निह्नुतं विष्णुभावं
प्रत्यक्षं द्रष्टुकामः पदमपि हरेः केवलं गोपलोकः ।
षष्ठादिस्थानस्पष्टीकरणचणगुणं सुष्ठु सन्दर्शितोऽसौ
स्वस्थानं तुष्टिपुष्टिप्रदमिदममुना विष्टपाधीश्वराणाम् ॥]

ब्रह्मानन्दमहासिन्धौ मग्नमाभीरमण्डलम् ।
पुनराकृष्य मायाब्धावेव पातितवान् हरिः ॥ ३० ॥

चूताशोकपलाशकेसरतरुप्रायप्रसूनासव-
स्फीतामोदहृताळिकोकिलरवैरापूर्णकर्णोत्सवः ।
मालेयानिलधूतनूतनलतागुच्छाळिरच्छप्रभ-
प्रालेयांशुरशोभतामितरुचा कान्तो वसन्तोदयः ॥ ३१ ॥

यत्प्रागाश्रुतमद्रिजार्चनविधिव्युष्टावभीष्टं मिथः
स्वेनैव स्मरतापिताय सुदृशां वृन्दाय नन्दात्मजः ।
कर्तुं तं मधुमासभासुरमहारण्ये कळिन्दात्मजा-
तीरे प्रारभते स्म मारकदनक्रीडारसाडम्बरम् ॥ ३२ ॥

व्यत्यस्ताङ्घ्रिसरोरुहस्थिति दरव्यानम्रकम्रानन-
प्रत्यालीढनिकुञ्चितोरु निबिडव्यायस्तवक्षःस्थलम् ।
अर्धामीलितनेत्रमूर्ध्वविचलद्वामभ्रु वामभ्रुवा-
माह्वानार्थमपूपुरन्मुरळिकामश्वत्थमूले स्थितः ॥ ३३ ॥

आनन्दाकुलमर्धजग्धयवसस्तब्धाङ्गसारङ्गकं
जानुद्वन्द्वनिविष्टपाणितरुशाखासीनशाखामृगम् ।
उन्मुक्तोन्मदहास्तिमस्तकतटीसञ्चारपञ्चाननं
वृन्दारण्यगसत्त्ववृन्दमचलं जातं यदाकर्णनात् ॥ ३४ ॥

काकोलूकमशेषतोऽहिनकुलं मातङ्गपञ्चाननं
गोव्याघ्रं महिषाश्वमित्यपि मिथः स्पर्धालु यच्छाश्वतम् ।
द्वन्द्वं तत् पुनरेकवत् समजनि व्यामुक्तवैरं वने
स्वैरं तन्मुरळीरवाख्यममृतं पीत्वा विमूढं स्थितम् ॥ ३५ ॥

तदनु च तदाकर्ण्य पूर्णप्रमोदघूर्णमानमानसानि, सम्भूत-कम्पस्वेदरोमाञ्चादिसात्त्विकविकारविकासविह्वलानि, सम्भ्रान्तानि, सम्प्रमुक्ततत्तदावश्यकगेहकृत्यानि, नित्यनैमित्तिकविधिविधानपारतन्त्र्यमप्यपाकुर्वन्ति, पत्यपत्यमित्रपितृमात्रादिवर्गमप्यनर्गळसमुद्गळदानन्दमन्दीभूतमनस्तया विस्मरन्ति, स्मरशरदहनदन्दह्यमानहृदयानि प्रवृद्धकौतुकान्यर्धसमुज्झिताभरणपरिग्रहाणि गोपनितम्बिनीकदम्बकानि विलम्बं विना वनान्तराभिमुखानि प्रातिष्ठन्त ॥

काचित् काञ्चनकाञ्चिदाम कमनी कण्ठे दधाना यया-
वन्या नूपुरमामुमोच करयोरङ्घ्रिद्वये किङ्किणीम् ।
कर्णे लम्बयति स्म हारमपरा काचित् पुनः कङ्कण-
श्रेणिं श्रोणितटे दृढीकृतवती सूत्राञ्चलोद्गुम्फिताम् ॥ ३६ ॥

काचित् त्वरापरवशा करसंगृहीते
बिम्बागतात्मवदनेन्दुनि सम्मुखीने ।
सान्द्रीकृतं मृगमदं किल तूलिकाग्रे-
णादाय दर्पणतले तिलकं बबन्ध ॥ ३७ ॥

प्रसाधिकायाः प्रसभं कराग्रात्
प्रसाधितार्धं नवयावकेन ।
पादं स्वमाकृष्य पलायतैका
पुरः प्रयान्तीमपरां जिगीषुः ॥ ३८ ॥

अहं पुरोऽहं पुर इत्यशेषाः
समं स्म धावन्ति सरोरुहाक्ष्यः ।
याभूत् पुरस्तत्पुरतोऽपराभू-
ज्जवेन तस्याश्च पुरः पराभूत् ॥ ३९ ॥

दुग्धं किलार्धश्रपितं विहाय
दुधाव यत् काचन गोपनारी ।
तदेव वह्नौ पतितं क्वथित्वा
तस्या बभूवाहुतिरिष्टसिद्ध्यै ॥ ४० ॥

दुग्धं दोदुहती पयस्विनितमामाकर्ण्य वेणुस्वनं
मुग्धा दुग्धघटं समुज्झितवती सद्यः पलायिष्ट या ।
आकण्ठं परिपीतदुग्धसुहितो वत्सोऽनुजग्राह तां
भद्रं ते भवितेति तेन किमसौ गोविन्दमाविन्दत ॥ ४१ ॥

एवममेयमायाविमोहितसमस्तजनाचित्तस्य चित्तत्त्वभूतस्य भगवतो वासुदेवस्य वंशीरवामृतनदीप्रवाहमार्गेणाकृष्यमाणाः समुज्झित-

सकलकार्या विगतधैर्या गोपनार्यः सत्वरातिक्रान्तकान्तारगिरिकिटक-सरित्तटादयो वृन्दीभूय वृन्दावनममन्दजवमभिगच्छन्ति स्म । पृच्छन्ति स्म च कन्दखननस्पन्दमानघनकुचकुम्भभारमन्दगमनाः कळिन्दजातटविपिनवाटविहारिणीः पुळिन्दसुन्दरीरिन्दिरारमणवृत्तान्तमधिकृत्य—

दृष्टो वा भवतीभिरिष्टविपिनक्रीडो युवा सुन्दरः
कश्चित् कचिदतुच्छया तनुरुचा कन्दर्पदर्पापहृत् ।
आताम्राधरपादपाणिकमलः पीताम्बरो नूतन-
स्निग्धाम्भोदकळायकोमळतमश्यामश्रियो धाम यः ॥ ४२॥

यस्यायं तरळीकरोति मुरळीनादः सुधासोदरो
नास्माकं परमत्र चित्तमखिलत्रैलोक्यभाजामपि ।
तच्छ्रुत्वा वयमागता युवतयो वंशीनिनादामृतं
किञ्चैतन्मधुरं प्रवर्तयति यस्तं द्रष्टुमीहामहे ॥ ४३ ॥

वंसीणिस्सणसीहुपाणजाणिउंमाआ खु माणंसिणी-
संघा जंपिअ जंपि किंपि जणअं जं कं पि मज्झेपहम् ।
सम्पत्ता सविहं विहंगममहावाहस्स णाहस्स दे
संपुण्णाअरमाणमंति तमिणं सव्वे सिणेहोल्लिरा ॥ ४४ ॥

[वंशीनिस्वनसीधुपानजनितोन्मादा खलु मनस्विनी-
सङ्घा जल्पयित्वा यत्किमपि जनकं यं कमपि मध्येपथम् ।
सम्प्राप्ता सविधं विहङ्गममहावाहस्य नाथस्य ते
सम्पूर्णादरमानमंस्तमेनं सर्वे स्नेहार्द्राः ॥]

स्मारं घोरं ज्वरमधिगताः स्वान्तिकं सम्प्रपन्नाः
 स्मेरश्रीमन्मुखसरसिजो वीक्ष्य गोपाङ्गनास्ताः ।
प्रारब्धः सन्नपि रमयितुं रासलीलाभिरासां
 सारं प्रेम्णो विविदिषुरभाषिष्ट वामं मुकुन्दः ॥ ४४ ॥

कच्चित् स्वागतमङ्ग! वः सुवदनास्तुङ्गप्रमोदोल्लस-
 न्मच्चित्ताम्बुरुहं विधत्थ नितरामाकस्मिकाभ्यागमात् ।
गन्तव्या ननु यूयमायतदृशो! गन्तार एते वयं
 हन्तेदं विपरीततां नयथ किं प्राज्ञाभ्युपज्ञं मतम् ॥ ४५ ॥

सन्ध्येयं समुपागता समुचितैः सायन्तनैः कर्मभिः
 संध्येयं सवितृस्वरूपमखिलैः सद् ब्रह्म जिह्मेतरम् ।
स्त्रीणां शाश्वतधर्म एष पतिवत्नीनां यदङ्गैर्निजैः
 सुस्नातैः शुचिभिः स्वभर्तृचरणाम्भोजन्मशुश्रूषणम् ॥ ४६ ॥

यथा यथा बिम्बमिनस्य लम्बते
 तथा तथोद्गच्छति कामिनां मनः ।
विधूय सन्ध्यायवनीं नटत्यदः
 प्रियास्यरङ्गे खलु सूत्रधारवत् ॥ ४७ ॥

सान्द्रोन्मेषप्रदोषानिलसुखविकसन्मालतीसौरभाढ्ये
 कन्दर्पज्यानिनादायितमधुपवधूसङ्घझङ्कारघोषे ।
मन्दोद्यच्चन्द्रपादक्रमगलिततमस्सन्ततौ हन्त! सन्ध्या-
 काले कान्तान् जहत्यो हहह! बहुमहापापवत्यो भवत्यः ॥ ४८

स्वान् स्वानेव गृहानुपेत्य गृहिणः शुश्रूषमाणाः शुभा-
 मृद्धिं विन्दत मन्दता हि महते पापाय तापाय च ।

स्तन्यैस्तर्पयत स्तनन्धयकुलं मातापितृप्रीतिकृ-
द्धन्यं चेष्टितमातनुध्वमिदमेवाब्रवीमि वः साम्प्रतम् ॥ ४९ ॥

स्त्रीणां दैवतमत्र जीवितसमाद्भर्तुः परं नास्ति स
क्षीणो वा विरसोऽथवाथ विकृतस्वाङ्गो विरक्तोऽपि वा ।
कुष्ठी वा कटुनिष्ठुराक्षरवचा दुष्टोऽतिरुष्टोऽपि वा
स्पष्टं धर्म्यामिदं ब्रवीमि न परित्याज्यः कुलस्त्रीजनैः ॥ ५० ॥

शर्यातिस्तनया यथा सविनया धन्या सुकन्याह्वया
दुश्शीलं च्यवनं मुनिं दशमिनं शुश्रूषते स्मादरात् ।
मौद्गल्यं कृमिजग्धवृद्धवपुषं क्रुद्धं च नाळायनी
तद्वद्भर्तृषु वर्तितव्यमुपरिश्रेयोर्थिभिः स्त्रीजनैः ॥ ५१ ॥

इत्यादि सोदाहरणमुदारमुदाहरति सत्योद्ये निरवद्यपतिव्रता-
धर्मोपदेशपरायणे भगवति नारायणे निरतिशयदुर्वारदुर्विषहविषमविष-
धरविषज्वालोपमविषमशरशरनिकरकुकूलानलदन्दह्यमानमानसा मान-
सारविश्लेषवशादवशतराणि निरर्गळनिर्गळद्बाष्पनिष्पन्नगद्गदस्खलिता-
क्षराणि दीनदीनानि वचनान्याचक्षत सविलक्षमानमितकन्धराः
सोन्मादजनधुरन्धराः प्रकृतिबन्धुरबन्धूकबन्धुमधुरतराधरा धरातलसुरा-
ङ्गना गोपाङ्गनाः ॥

मैवं वादीर्मदनकदनायासमन्दीकृतेहै-
र्देहैर्हाहा ! कथमपि समासेदुषीरन्तिकं ते ।
अस्मानस्मात् तव पदसरोजन्मनोऽनन्यनाथा
याथातथ्यं जगति विदते कृष्ण ! ते किं निवेद्यम् । ५२॥

त्वं नो लक्ष्मीरमण! रमणस्त्वं हि नः प्राणबन्ध-
स्त्वं नो देहस्त्वमसि हृदयं त्वं न एषोऽन्तरात्मा ।
त्वं नः शर्म त्वमसि सुमते! जन्मसाफल्यहेतु-
स्त्वं नो दैवं परममथवा या वयं स त्वमेव ॥ ५३ ॥

स्मारं रूपं तृणमिव गुणीभूतमातन्वतस्ते
स्मारंस्मारं सततमतसीगुच्छवत् स्वच्छशोभम् ।
राजद्भूषारचनरुचिरं राजगोपालबाल!
स्फारश्रीकं वपुरयि! वयं प्राणिमः प्राणनाथ! ॥ ५४ ॥

मारश्चैष स्वतनुसुषमाहारिणे तेऽभ्यसूयन्
धीरः सन्नप्यजित! न विजेजेतुमीशो भवन्तम् ।
रन्ध्रान्वेषी स खलु कितवो हिंसितुं दासिकास्ते
सन्नद्धो नः प्रहरति शरैर्येन स त्वज्जयी स्यात् ॥ ५५ ॥

वसन्तश्चासन्तं प्रथममपि भावं प्रबलय-
त्यलक्षामुत्कण्ठामपि तनुभृतामुल्बणयति ।
अमूषामस्माकं किमुत भवदाबद्धमनसां
सलक्षाशंसानामतिरतिसमुद्दीपन इति ॥ ५६ ॥

पडिण्णाअ पुव्वं सुरहिसमए वो मणरहं
सुहं पूरिस्संति प्पमुसिअवरिळ्ळेण तुमए ।
स काळो संपत्तो जिणइ जमुणाडं च तमिणं
जणाणंदो चंदो विअ समुदिओ किं ण मुणसे ॥ ५७ ॥

[प्रतिज्ञातं पूर्वं सुरभिसमये वो मनोरथं
सुखं पूरयिष्यामीति प्रमुषितवस्त्रेण त्वया।

स कालः सम्प्राप्तो जयति यमुनातटं च तदेतत्
जनानन्दश्चन्द्रोऽपि च समुदितः किं न जानासि ॥]

इति पशुपनितम्बिनीजनाना-
मतिरतिभाववशंवदाशयानाम् ।
सकरुणमुपकर्ण्य दीनवाचः
स खलु जगाद मुदाकुलो मुकुन्दः ॥ ५८ ॥

जानीमो वयमङ्गना! मनसिजातङ्केन संक्लेशितं
चेतो वो मयि बद्धरागसुभगं वीतोपधीदं चिरात् ।
किन्त्वस्यैव हि दार्ढ्यमाकलयितुं किञ्चित्प्रतीपाक्षरा-
मेवं वाचमवादिषं विषयिणः स्त्रीबुद्ध्यविस्रम्भिणः ॥५९॥

वस्त्रापहारो विहितो मया यत्
प्रस्तावना सा रतिनाटिकायाः ।
अङ्कानिवास्याश्चतुरो रजन्या
यामान् नयामीष्टरसाभिनीत्या ॥ ६० ॥

मलयपवनप्रेङ्खद्वल्लीनिकुञ्जसुमञ्जुळं
कलयत कळिन्दाद्रेः पुत्र्याः शुभं सरितस्तटम् ।
यदिदममलं रात्रौ रात्रौ शशाङ्कमरीचिभिः
सुविशदसुधाकम्रैराम्रेडितद्युति जन्यते ॥ ६१ ॥

अत्र हि,

माकन्दाशोकमन्दारकवकुळपलाशादयो ये वसन्ते
पुष्प्यन्तः सन्ति वृन्दावनभुवि तरवः पुष्पजातानि तेषाम् ।
अस्त्रीकुर्वीत सर्वाण्यपि कुसुमशरः सोऽन्यथा किं क्षमेत
प्रत्येकं वः प्रहर्तुं भवतु च शरधौ सञ्चिता पञ्चबाणी ॥ ६२ ॥

एकैका मासि मासि ह्यतिथिरिह तिथिः पूर्णिमा पूर्णमिन्दुं
सूते या सा तु मासद्वयमखिलमभिव्याप्नुयादात्मनैव ।
अन्यासां सा तिथीनामसितसितरुचां स्यानिवद्धावमाप्ता
सर्वादेशोऽपि तत्तद्दिवससमुचितं कर्म निर्वाहितु ॥ ६३ ॥

निष्यन्दैश्चन्दनानां मलयगिरिभुवामङ्ककान्यङ्गनानां
लिम्पन्तः सन्तु लुम्पन्तु च सुरतभवक्लान्तिमेकान्तशीतैः ।
माद्यद्वेतण्डगण्डच्युतमदलहरीसौरभीमाददाना
दाक्षिण्यं दाक्षिणात्या दधतु निधुवने बन्धवो गन्धवाहाः ॥

कल्पन्तामिह पुष्पतल्परचने निष्पन्नशिल्पागम-
व्युत्पन्ना वनदेवता वनरुहां वासन्तिकैः पल्लवैः ।
एतद् वैतसमास्तृणन्तु परितः कुञ्जस्थलं मञ्जुळं
सिञ्चन्तु स्फुटपङ्कजोदरमधुस्यन्देन मन्देतरम् ॥ ६५ ॥

हासश्रीभासमानाननसरसिरुहो मानिनीभिः समेतो
व्यासश्रीनारदाद्यैर्मुनिभिरभिनुताडम्बरामम्बरस्थैः ।
रासक्रीडामथोपाक्रमत बत मधौ माधवो माधवे वा
मासे मासेवितोरःस्थलचलघनमालाभिरामस्वरूपः ॥ ६६ ॥

काळिन्दीपुळिनतलं कलासमग्र-
प्रालेयद्युतिकरजालशुभ्रशुभ्रे ।
आस्तीर्य प्रतिनवमुत्तरीयवास-
स्तत्रासावुपविशति स्म वासुदेवः ॥ ६७ ॥

तत्रामूरुपवेश्य गोपवनिता वेश्याभुजङ्गो यथा
वेश्याभिः सममारमत्यविरतं ताभिस्तथा माधवः ।

आश्लेषाधरपानचुम्बननखव्याघातदन्तक्षत-
प्रायैरङ्गजसङ्गरोत्सवकलालीलायितैरारमत् ॥ ६८ ॥

किं च,

गोपीषु तासु सकलासु कलाधिनाथो
वापीषु यद्वदनुबिम्बितबिम्बमूर्तिः ।
एकोऽपि नाम बहुरूप इवावभाति
श्रीकामुकोऽपि समदृश्यत भिन्नभिन्नः ॥ ६९ ॥

यावन्तः सन्ति कान्तिप्रसभजितसुपर्वाङ्गनाङ्गश्रियस्ता
विस्तारोत्तुङ्गताधःकृतशिखरिकुचाभोगवत्यो युवत्यः ।
तावन्तस्तत्र सत्राशनमुनिनिकरैरम्बरस्थैरधस्ताद्
देवाः श्रीवासुदेवाः शिवशिव समदृश्यन्त सङ्क्रीडमानाः ॥७०॥

मया सह मया सह स्वयमयं परिक्रीडते
स्त्रियो धिगपरा इमा ध्रुवममाधवप्रेयसीः ।
इति स्म गुरुविस्मयस्मयमुदो मदोज्जृम्भिता
भवन्ति हरिमायया युवतयो हि सर्वा अपि ॥ ७१ ॥

एकामेव कुमुद्वतीमतिमुदा राकासुधादीधिति-
र्लोकानन्दकरश्चिराय रमयत्याक्रम्रमूर्तिर्यथा ।
एकामेव तथानिशं रमयति श्रीवासुदेवोऽपि मा-
मेकान्तप्रणयीति बह्वमनुत स्वं स्वं वधूमण्डली ॥ ७२ ॥

अहो सौभाग्यं मे यदयमदयोऽन्यासु सततं
मयि क्रीडासक्तो मयि सुरतलोलो मयि रतः ।
मयि प्रेमस्निग्धो मयि मदनतापाकुलमना
इति प्रत्येकं सा युवतिततिरुच्चैर्मदमधात् ॥ ७३ ॥

सव्वाणं गव्विणीणं स हु महुमहणो गव्वणिव्वासणत्थं
पाढत्तो गाढपेम्मो वि खु विणअविणाभावमूढेसु वेरी ।
हत्थे घेत्तूण राहं मअकअमवराहं विणा वट्टमाणं
मज्झेगोवीकदम्बं विविणभुवि तिरोभूदवंतो सअं तो ॥ ७४ ॥

[सर्वासां गर्विनीनां स खलु मधुमथनो गर्वनिर्वासनार्थं
प्रारब्धो गाढप्रेमापि खलु विनयविनाभावमूढेषु वैरी ।
हस्ते गृहीत्वा राधां मदकृतमपराधं विना वर्तमानां
मध्येगोपीकदम्बं विपिनभुवि तिरोभूतवान् स्वयं ततः ॥]

तिरोभूते तस्मिन् मिहिर इव शोकेन तमसा
समाक्रान्तं वृन्दं जगदिव दिवापीह सुदृशाम् ।
मिथो नापश्यन्नो पदमपि पदाद् गन्तुमशक-
द्दिशो वा नाज्ञासीदजनि रजनीमास्थितामिव ॥ ७५ ॥

हाहा गोविन्द ! वृन्दावनभुवि वनितावृन्दमानन्दमन्दं
स्नेहाद् गेहादि सर्वं जहदिह विहरत् प्रेमकामान्धचेतः ।
हित्वा कुत्र प्रयातो वससि सह निराबाधया राधया त्वं
न त्वा नत्वापि हा धिग् वशयितुमशकच्छेषयोषासमूहः ॥ ७६ ॥

विरहनिरहङ्कारा इत्थं विलप्य विलप्य ता
विपिनभुवि तं विश्वाधीशं विचिक्युरितस्ततः ।
स्मरकृतमहोन्मादभ्रान्तान्तरङ्गतयाङ्गना-
स्तरुमृगखगानप्राक्षुश्च प्रियस्य कथां हरेः ॥ ७७ ॥

चूतागमवर ! कथय सखे ! धृत-
पीताम्बरमरुणाधरचरणं ।
चूताशुगाजितमङ्गरुचाखिल-

चेतोहरमरविन्दविलोचनम्
अमलकळायश्यामळकोमळ-
ललितकळेबरसुषमासुन्दर-
मिन्दुमुखं मृदुमन्दस्मितरुचि-
निन्दितकुन्दममन्दविलासम्
क मपि पुमांसं कमनीयांसं
कम्बुगळान्तरलम्बितकौस्तुभ-
घनवनमालाहारकलापं
घनरुचिकुन्तळबन्धनिरन्तर-
तरळकलापिकलापकमविकल-
मुरळीनादमयामृतरसभर-
तरळीकृततमनिखिलचराचर-
भुवनं भुवनाधीशमुदारं
किमलोकत स भवानिह कुहचन
कुहनामानुषमतिसुकुमारम् ।
मारविलासविशेषविदेष हि
मानितरासविहारमहामहमहम्
अहरहरिह विहरन्तीरमुना
यमुनातटभुवि सहिता महिता
वनितावितती रनितरशरणाः
करुणावरुणावासः सन्नपि
तरुणामृतरुचिरुचिररुचिः सुर-
तरुणा सदृशो वितरणकर्मणि
नर्मणि साधुर्निर्मलमतिरपि
सरभसमस्मानहह! विहाय स
सरसिरुहाक्षो हन्त तिरोऽभूत् ॥

डज्झंतं विरहग्गिणा धमधमाअंतेण संते सइ
　पज्जालुज्जळवज्जवह्निसरिसं कंदप्पदिप्पाणळम् ।
दुव्वारं चिरमुव्वहंतमवलासत्थं समत्थं विणा-
　कुव्वाणो कुहणामणुस्सकुमरो सारङ्गि दूरं गओ ॥७८॥

[दह्यमानं विरहाग्निना धमधमायमानेन स्वान्ते सदा
　प्रज्वालोज्ज्वलवज्रवह्निसदृशं कन्दर्पदीप्तानलम् ।
दुर्वारं चिरमुद्वहन्तमबलासार्थं समस्तं विना-
　कुर्वाणः कुहनामनुष्यकुमारः शार्ङ्गी दूरं गतः ॥]

माकन्दप्रसवस्रुतां मधुझरीमाकण्ठमास्वादय-
　न्त्याकम्रस्वरपञ्चमं च सरसं मुञ्चन्ति ! किञ्च त्वया ।
दृष्टः कोकिलसुभ्रु ! गोकुलमहाशुक्तिस्थमुक्तामणिः
　कच्चित् कश्चिदतुच्छकान्तिरमितश्रीपौरुषः पूरुषः ॥७९॥

संदृष्टश्चेत् स खलु वनितावञ्चकः पञ्चबाणः
　साक्षाद्भूतः स्वयमिव युवा सञ्चरन्नञ्चितश्रीः ।
तद्विश्लेषव्यथितमनसां कोकिले ! गोकुलस्त्री-
　सङ्घातानामधिकविधुरां दुर्दशां ब्रूहि तस्मै ॥८०॥

अन्विच्छ त्वा यदृच्छामनुजमनुवनं पृच्छ वार्तां तवार्ता
　धूर्त ! प्रायेण वीरुद्द्रुमपतगमृगानृच्छ मूर्च्छामतुच्छाम् ।
आक्रन्दामुक्तकण्ठं नयनजसलिलैः किञ्च सिञ्चाङ्गमङ्गं
　सोन्मादं जल्प यत्किञ्चन युवतितितिः किं न दैन्यं विधत्ते ॥

　　इति निवेद्य वेदमयात्मने
　　　विधुरवेदमतीव दयालवे ।

युवतिदर्शमुपेत्य रिरंसवे
पिकनितम्बिनि! पीतदुकूलिने ॥ ८२॥

हं भोः कुम्भिनि! कुम्भिनी तव नवैः शय्या शुभा शाड्वलै-
र्हस्तप्राप्यतमो यथेष्टमशनं ते सल्लकीपल्लवः।
कण्डूयन् मृदु हन्त दन्तशिखरेणायं च शुश्रूषते
कान्तस्त्वामिभराडहो सखि! महत् सौभाग्यभाग्यं तव ॥८३॥

एषा कापि मृगी मृगं मृगयुना विद्रावितं दूरतो
मार्गंमार्गमितस्ततोऽश्रुकलुषे व्यापारयन्ती दृशौ।
अर्धग्रस्तविनिष्पतत्तृणमुखी रोरूयमाणा भृशं
दीना नोऽनुकरोति काननतले सख्यः! समालोक्यताम् ॥८४॥

मानुष्योक्त्या मनुजमनसो हारिके शारिके! नः
सन्देशार्थान्युपहर हरेरक्षतान्यक्षराणि ।
संत्यज्य द्रागपकृपमनागस्कृदप्यङ्गनानां
वृन्दं वृन्दावनभुवि परत्राथवा लीयते यः ॥ ८५॥

पाणौ वेणुः स्फुरति कुटिले कुन्तले बर्हिबर्ह-
[1]श्रेणिः श्रोणीतटभुवि दृढं नूतनं पीतचेलम् ।
गात्रं नेत्रप्रियकृदतसीगुच्छसच्छायमच्छं
तस्यैतानि प्रियसखि! समालक्षयेर्लक्षणानि ॥ ८६ ॥

सर्वासां नः पशुपसुदृशां प्रेम्णि साधारणेऽपि
प्रायस्तस्य प्रणयिनितमा सापराधापि राधा ।
यस्मादेनामपि विभुरुपादाय मायाकुमारो
मारोद्यावप्रणयनपरः कुत्रचिद् गूढमास्ते ॥८७॥

---

१. 'श्रेणी' क.

कालश्चासौ सुरभिरटवीकुञ्जपुञ्जो विविक्तो
मुक्तागौरस्फुटशशिरुचिर्दीर्घयामा त्रियामा ।
कामाद्वैते बहुगुणनिकौ राधिकामाधवौ तौ
तस्मादस्मिन् सुभगमिथुने कैर्न भाव्यं विलासैः ॥ ८८ ॥

तं देशं त्वं कथमपि समासेदुषी सत्यपीमं
सन्देशं नः कथमिव मिथः शौरये शंसितासि ।
दुष्प्रापं तं नियतमषडक्षीणमेकं रहस्तं
यन्नीराधो न भवति विभोः पार्श्वभागः कदापि ॥ ८९ ॥

स्नानं भोजनमासनं च शयनं यानं च पानं तथा
जाग्रत्स्वप्नसुषुप्तयश्च सकलं चैतत् समं यत् तयोः ।
राधामाधवयोरयोगकलयाप्यस्पृष्टयोरिष्टयो-
रेकस्मै हरये मिथः कथयितुं शक्नोषि यावत् कथम् ॥ ९० ॥

इत्थमाद्यसम्बन्धमगणितसचेतनाचेतनविभागकल्पनजल्पन-तत्परासु अनल्पकल्पान्तानलकल्पविप्रयोगदहनदन्दह्यमानमानसासु कष्टमष्टमीमनङ्गावस्थामधितिष्ठन्तीषु विलपन्तीषु विलुठन्तीषु विवलन्तीषु विमुह्यन्तीषु विश्वनाथं विचिन्वतीषु विक्लबतां वितन्वतीषु समधिगत-विविधसन्तापासु गोपाङ्गनासु,

तत्रोच्चैरुन्मदिष्णुः स्मृतहरिचरिता पूतनाति स्म काचिद्
गोपी गोपालबालन्त्यपिबदथ कुचौ कापि तस्या वयस्या ।
एका चाघासुरन्ती विवृतमुखगुहाशेत भूमौ लुठन्ती
तद्वक्त्रान्तःप्रवेशाभिनयनमकरोत् कापि कृष्णायमाना ।। ९१ ।।

आळीं काळियपन्नगं विदधती तन्मस्तकारोहिणी
केळीताण्डवमाततान कमलाकान्तायमानापरा ।

अन्या काप्यबकासुरन्मुरहरन्त्यन्या च जन्यं तयो-
रन्योन्यं क्वचिदत्र कृत्रिमतमत्रोटित्रुटिप्रक्रमम् ॥ ९२ ॥

पळंबाअंतीए गळभुवि ठिआ कावि कमणी
बळाअंती मुट्ठिं खिवइ किर से मुद्धणि मुहू ।
अहो एक्का एक्कं परिकळिअ गोवड्ढणगिरिं
ठिआ गोवी गोविं धरिअ करणाळम्मि सुइरम् ॥ ९३ ॥

[प्रलम्बायन्त्या गलभुवि स्थिता कापि कमनी
बलायन्ती मुष्टिमक्षिपत् किलास्या मूर्धनि मुहुः ।
अहो एका एकां परिकल्प्य गोवर्धनगिरिं
स्थिता गोपी गोपीं धृत्वा करनाले सुचिरम् ॥]

दिष्ट्या दृष्टिपथं ममायमयते मन्दस्मिताद्रोननः
कृष्णा कृष्णघनाळिकोमळतनुः किं नाळि ! दृष्टस्त्वया ।
क्वासौ तिष्ठति नेक्ष्यते सखि ! मया मिथ्या त्वया कथ्यते
किं मिथ्येति विशङ्कसे करतले गृह्णाति मामेष भोः ॥ ९४ ॥

आलिङ्गत्येष चुम्बत्यधरमधु मया पाययत्यायताभ्यां
दोर्भ्यामर्धश्लथं मे श्लथयति वसनग्रन्थनं किं ततोऽन्यत् ।
इत्थं प्राह स्म मोहस्मरबलकलितभ्रान्तिसन्दर्शितं तं
सन्तं साक्षादिवाग्रे मधुरिपुमाधिकृत्याङ्गना काचिदाळीम् ॥ ९५ ॥

तदन्तरे च निरन्तरतरुलतानिकुरुम्बकम्बाळितेषु निगूढ-तयातिसुन्दरेषु गिरिकन्दरेषु मन्दपवनोपनीतसारसमुरभिनीरेषु सरस्तीरेषु मकरन्दतुन्दिलसिन्दुवारकुन्दमाकन्दमन्दारकुसुमपरिमळतरळमिळदळिपटलगळतलविगळितकलकलकलितकर्णानन्देषु कळिन्दजा-

तटनिगूढकाननेषु च निभृतं सञ्चरन्तौ पञ्चशरसमरकेळिप्रपञ्चमुदञ्चितानन्दमनुभवन्तावसाधारणप्रणयपेशलौ राधामाधवावतिचिरमंरसाताम् ॥

राहा सोहग्गगव्वं वहइ बहुवहूमण्डळं वंचअंतो
गोविंदो केवलं मं रमआदि खु रमावल्लहो दुल्लहो वि ।
मण्णे मं णेदुकामो विअणभुवमिमो रासकेळिंच्छळेणं
अण्णाओ मोहअंतो खणमणुभुवए हंत दक्खिण्णदुःखम् ॥९६॥

[राधा सौभाग्यगर्वमवहत् बहुवधूमण्डलं वञ्चयन्
गोविन्दःकेवलं मां रमयति खलु रमावल्लभो दुर्लभोऽपि ।
मन्ये मां नेतुकामो विजनभुवमिमा रासकेळिच्छले ननु
अन्या मोहयन् क्षणमनुभवतु हन्त! दाक्षिण्यदुःखम् ॥]

कान्तारसञ्चरणतश्चरणद्वयं मे
क्लान्तं कदध्वनि न गन्तुमिह क्षमेऽहम् ।
स्कन्धे वहत्वयि ! भवान् कियदन्तरं मां
किं तेन ते क्षतिरिति स्म तमाह राधा ॥ ९७ ॥

शरीरार्धे शम्भुर्विधिरपि मुखे विष्णुरुरसि
प्रकृष्टेन प्रेम्णा वहति सततं किं न दयिताम् ।
मम स्कन्धे किं ते वहनमहितं किन्तु महितं
तदारोहांसं मे सुमुखि ! सुखमित्याह भगवान् ॥ ९८ ॥

भूमावानम्रकम्रानममुपविशतो राधिका माधवस्य
स्कन्धं प्रारोढुकामा निजचरणमुदाक्षिप्यदेकं यदा सा ।
आकाशारोहणं तत् समजनि विपिन तत्र तस्यास्तदानी-
मेकान्तप्रेमधामापि स कपटनरस्तत्क्षणं यत् तिरोऽभूत् ॥ ९९ ॥

सा च साचीकृतवदनेन्दुरमन्दमन्दाक्षशोकमोहसन्त्राससम्भ्रान्तचेताः हा प्रियतम! हा महानुभाव! हा मायामनुज! सुन्दर! मन्दभाग्यां मामपि महारण्यमुपनीय पृथगुपलालनच्छलेन परित्यक्तवानसि, प्रसीद प्रसीद प्रकाशयात्मानं, प्रकामरमणीयाकार! सुकुमार! नन्दकुमार! माराधिकमनोहराङ्ग! निरपराधामपि राधामनाथामिह महाभीतिकरहरिशरभकरितरक्षुशार्दूलवृकादिहिंस्रसहस्रनिरन्तरे वनान्तरे किमु समुज्झसीति मुहुर्मुहुर्मुक्तकण्ठमाक्रन्दन्ती धरणीरजोरूषितशिथिलपतितकेशपाशा केशवाशापरवशा कथंकथमपि गत्वा तत्रतत्र तमेव देवकीनन्दनं गवेषयन्तं चरन्तमपरगोपिकासमूहमनुमिळति स्म ॥

राधे! किं त्वामपि स कितवस्त्यक्तवानत्युदार-
प्रेम्णः पात्रं त्वमसि किमहो तस्य नीतासि यस्मात्।
कुत्र स्नेहो भवति कुहनामानुषस्यास्य हास्यं
दास्यं कुर्वत्यपि न करुणा यस्य गोपीकदम्बे॥ १०० ॥

धन्या सा खलु पूतना निजमपि स्तन्यं ददाना मुदा
या तस्मै कुहनार्भकाय तत एवापद्यत व्यापदम्।
अस्मांस्त्वेष न हन्ति हन्त! मदनेनास्त्राग्निना दाहय-
त्यङ्गारे विरहाह्वये श्रपयति प्रेतेशवत् पापिनः॥ १०१ ॥

एव्वं सव्वासु गव्वक्खअविसअविसुद्धंतरंगासु तासुं
णिव्विण्णासुं विसण्णासु अ विविहविळावासु गोवंगणासुम्।
कारुण्णं तो वहंतो स हु महुमहणो कामुओ जामिणीए
मज्झे पच्चक्खदिट्ठोजणि घणपडळं भिंदमाणो व चंदो॥१०२॥

[एवं सर्वासु गर्वक्षयविशदविशुद्धान्तरङ्गासु तासु
निर्विण्णासु विषण्णासु च विविधविलापासु गोपाङ्गनासु।

---

१. 'दारां प्रे' क.

कारुण्यं ततो वहन् स खलु मधुमथनः कामुको यामिन्याः
  मध्ये प्रत्यक्षदृष्टोऽजनि घनपटलं भिन्दमान इव चन्द्रः ॥]

तत्र प्रत्यक्षदृष्टे सति हसितसुधास्यन्दिवक्त्रेन्दुबिम्बे
  किं ब्रूमः पद्मनाभे पशुपचलदृशामन्तरानन्दसान्द्रम् ।
व्यापारं द्रागपारं चिरममृतमहासिन्धुमन्तः प्रविश्य
  क्रीडन्तीनां यथा स्यादजनि शतगुणः सम्प्रहर्षस्ततोऽपि ॥१०३॥

कण्ठे जग्राह कुण्ठेतरकुतुकवशादच्युतं कापि गोपी
  काचिन्मूर्ध्ना बभार त्वरितमुपगता तत्पदाम्भोजरेणून् ।
अन्या विन्यस्यति स्म स्वकुचमुकुळयोस्तत्कराब्जं गृहीत्वा
  पश्चाद्गत्वा तदक्षिद्वितयमपिदधे पाणियुग्मेन काचित् ॥ १०४॥

अन्यासामुत्सुकस्त्वं कुचभरपरिरम्भेण सम्भावयामि
  प्रच्छन्नं कापि गच्छन्निति कुटिलकटाक्षाञ्चलैराक्षिपन्ती ।
काचित् साचीकृतास्यास्थित नयनजलैः केळिनाळीकपूरं
  नारी नारायणाय प्रणयकुपितधी राधिकाकामुकाय ॥ १०५॥

आम्रार्द्रपल्लवमयं शयनीयमुच्चै-
  रम्लानबालबकुळप्रसवोपधानम् ।
सम्पाद्य काचन सरोरुहनेत्रमस्मिन्
  संवेश्य तत्पदयुगं शनकैरमृद्नात् ॥ १०६॥

कुरवककुसुमासवोपसिक्तै-
  र्मलयजपल्लवजालतालवृन्तैः ।
अभिकमुभयपार्श्वसन्निषण्णे
  सरसमवीजयतामुभे तरुण्यौ ॥ १०७॥

कथमपि मम चक्षुर्मार्गमभ्यागतस्त्वं
ननु शठ! पुनरस्मान्मा स्म यासीः प्रदेशात् ।
इति किमपि वदन्ती कापि तत्पादपद्मे
नवकुवलयमालाशृङ्खलेनाबबन्ध ॥ १०८ ॥

तल्पं कल्पितमुत्पलैरधिशयानं तं घनश्यामलं
कान्तं लोचनगोचरीकृतमपि व्यक्तं बताजानती ।
कुत्रासाविति पृच्छती प्रियसखीं बभ्राम मुग्धः क्षणं
काचित् सूचयति स्म पीतवसनं निश्चित्य चिह्नं चिरात् ॥१०९॥

पौष्पं तल्पं क्वचन रुचिरं कुत्रचिद् वस्त्रक्लृप्तं
क्वापि क्षौमप्रचितमुचितं पाल्लवं तत्परत्र ।
यद्यद् वृन्दावनभुवि ततं तत्र तत्रालुलोके
लोकेशाद्यैर्युवतिसहितः खेचरैर्वासुदेवः ॥ ११० ॥

कोणव्यापृतिमन्तरेण मधुरं नारायणाधोक्षज-
श्रीकृष्णाच्युतमाधवेति सततं तन्त्रीरवं मुञ्चतीम् ।
वीणां बिभ्रदद्भ्रशुभ्रशरदभ्रश्रीर्मुनिर्नारदः
सम्प्राप्तः सह पर्वतेन गगने तस्थौ मुकुन्दं स्तुवन् ॥ १११ ॥

गंधव्वा सपुरंधिआ सुरउरीवेज्जा अ विज्जाहरा
जंभारिप्पमुहा णिलिंपणिवहा सव्वेवि दिव्वा अणा ।
सेच्छामच्छरमच्छराण सरसं णच्चन्तमच्चंतसं-
तोसं तो पुरदो कदूण णिअरं पत्ता णहम्मि ट्ठिआ ॥ ११२ ॥

[गन्धर्वाः सपुरन्ध्रिकाः सुरपुरीवद्यौ च विद्याधराः
जम्भारिप्रमुखा निलिम्पनिवहास्सर्वेऽपि दिव्या जनाः ।

स्वेच्छामत्सरमप्सरसां नृत्यन्तमत्यन्तसं-
तोषं ततः पुरतः कृत्वा निकरं प्राप्ता नभसि स्थिताः ॥]

अधो ननृतुरङ्गना मुहुरधोक्षजस्याग्रतो
यथा खलु तथाम्बरे सुरपुरन्ध्रयो वज्रिणः ।
किमेतदनुबिम्बितं मुकुरभासि खे खेलनं
मुकुन्दसुदृशामिति भ्रममधुस्तदालोककाः ॥ ११३ ॥

तन्त्रीभिः स्वरसप्तकं समसृजत् षड्जादिभिः सप्तभि-
र्या वीणा व्रजसुभ्रुवां तदजयत् कण्ठस्वरः स्वैर्गुणैः ।
संज्ञाभूत् परिवादिनीति नियतं तस्मात् परीवादत-
स्तस्या इत्यमराङ्गना हरिवधूरेताः समस्तोषत ॥ ११४ ॥

वल्लव्यो वल्लकीभिः कतिचन मधुरक्वाणिनीभिस्तथान्या
वंशीभिः पूरिताभिः कतिचिदभिहतैः कन्दुकैरिन्दुमुख्यः ।
मङ्गल्यैरङ्गहारैरविकलमपराः साधु सङ्गीतसारै-
र्धूतक्रीडाभिरेका हृदयमहृषत प्रायशः शार्ङ्गपाणेः ॥ ११५ ॥

मध्ये मध्ये सकृष्णा पशुपमृगदृशां मण्डली मण्डलेन
क्रीडन्ती सा हरिद्रारुचिरुचिरतनुस्तत्र विभ्राजते स्म ।
केनापि भ्राम्यमाणा मुहुरपि परितः-काञ्चनी कम्रकान्ति-
प्रौढिः प्रत्यन्तरालं मरतकमणिभिर्गुम्फिता मालिकेव ॥ ११६ ॥

द्वे च द्वे च प्रणयिनितमे अन्तरा चान्तरा च
श्रीगोपालः स्वकरकमलप्रोततत्पाणिपद्मः ।
चारीभेदैश्चरणयुगलीचारुविन्यासजन्यै-
स्तालैः केलीमकृत कृतसङ्गीतशृङ्गारभङ्ग्या ॥ ११७ ॥

वर्णाश्रयाख्यं किल सप्तमात्रं
ताळं पदैकेन तथापरेण ।
चम्पाभिधं कञ्चन पञ्चमात्रं
समं स जग्राह रमासहायः ॥ ११८ ॥

विंशतिमात्रकमुभयं
लक्ष्मीताळश्च कुम्भताळं च ।
द्वाभ्यां पाणितलाभ्या-
मभ्याददिवानयं युगपत् ॥ ११९ ॥

एवंविधबहुविहितविहारं
देवं चलवनमालाहारं
केवलपूरुषमतिसुकुमारं
केशवमुपहिततनुमिव मारं
गोपवधूटीजारमुदारं
गोकमलाभ्यामेव सदारं
गोपितभुवनं विभुमविकारं
गोपकुमारं धीरगभीरं
हासश्रीजितकैरवकुन्दं
रासक्रीडनलोलममन्दं
रसिकशिरोमणिमागमकन्दं
रमिताभीरनताङ्गीवृन्दं
वृन्दावनभुवि विहरन्तं पशु-
वृन्दावनपरमनिशं तं दिवि

वृन्दारककुलमखिलमवन्दत
नन्दतनूजं नयनानन्दम् ॥

इति श्रीभागवतचम्पूप्रबन्धे चतुर्थः स्तबकः ।

अथ पञ्चमः स्तबकः ।

लक्ष्मीकान्तो वसन्तोत्सवममितरसं रासलीलाभिधानं
लक्ष्मीभूतेन्दुमन्दानिलमनसिशयं मासयुग्मावसानम् ।
सानन्दं तत्र वृन्दावनभुवि वनितावृन्दकन्दर्पबाधा-
सन्दर्भस्पन्दमन्दीकरणचणमहाडम्बरं संवितेने ॥ १ ॥

राधावक्त्रारविन्दप्रसृमरमकरन्दाभमन्दस्मितश्री-
सन्दोहस्यन्दसान्द्रस्नापिततनुरनुस्यूतकन्दर्पकेळिः ।
नन्दन् नन्दस्य सूनुर्नवघनपटलश्यामधामाभिरामो
रामाभिस्तत्र रेमे दिनमनु दिनकृन्नन्दिनीतीरभागे ॥ २ ॥

निर्वृत्तेऽस्मिन् निखिलजगतामेककान्ते वसन्ते
निर्विश्यैवं निरुपमरसोल्लासिकां रासकेळिम् ।
राधादीनां पशुपसुदृशामन्वितो वन्यमाली
मन्दं वृन्दैरगमदतिमोदाकुलं गोकुलं तत् ॥ ३ ॥

ततश्च कदाचिदुदारतरकुमारचरितभरितानन्देन नन्देन मन्देतरसरसगुणसमग्रेणाग्रजेन निजप्रभावप्रशमितविपल्लवैर्वल्लवैश्च सह

प्रवर्तितमहोत्सवप्रहर्षुलमहाजनकरम्बितमाम्बिकावनं नाम त्र्यम्बकायतनमायतचीनांशुकपिहिताम्बरं पीताम्बरः सम्प्रविश्य सम्भृतकनकमणिघृणिपटलघटितेन्द्रचापसान्द्रप्रभाडम्बरं शम्बरारिवैरिबिम्बम् अम्बुजार्कपारन्तीकुसुमतुलसीमालूरपत्रमालालङ्कृतम् अविरतप्रदीप्यमानमणिदीपसहस्रप्रभादूरानिराकृततमिस्रमजस्रप्रकाशं प्रणम्य प्रदक्षिणीकुर्वन् सर्वैः सह कुहचिन्मरतकमण्डपे विश्वनायको विशश्राम ।

रात्रौ तत्र महावसानविहितस्वापेषु गोपेषु तं
नन्दं सन्दशति स्म कोऽपि चरणे सत्साहसो वाहसः ।
प्रोद्बुद्धेन जनेन तेन सहसा सन्ताडितोऽप्युल्मुकैः
प्रोत्सिक्तः स विषेण नैनममुचत् किञ्चायमाकृष्टवान् ॥ ४ ॥

दट्ठं दुट्ठसरीसपेण जणअं कड्ढिज्जमाणं च णं
सिग्घं माहव ! रक्ख रक्ख ण हु सो मुक्खो विणिक्कामइ ।
सक्कंदेहि णिवेदिओ इअ हरी गावेहि सावेण जो
सप्पो होइ तमंघिणाच्छिवइ ता सज्जो स विज्जाहरो ॥ ५ ॥

[दष्टं दुष्टसरीसृपेण जनकं कृष्यमाणञ्चैनं
शीघ्रं माधव ! रक्ष रक्ष न खलु स मूर्खो विनिष्क्रामति ।
साक्रन्दैर्निवेदित इति हरिर्गोपैः शापेन यः
सर्पोऽभवत् तमङ्घ्रिणाक्षिपत्तदा सद्यः स विद्याधरः ॥]

नाम्ना कृष्ण ! सुदर्शनोऽप्यहमहिर्दुर्दर्शनः शापतो
जातो हन्त तपोभृतामपहसाद्धतोर्मयैवाहितात् ।
स्पृष्टोऽहं भवताधुना निजतनुं विन्दामि नन्दं जहद्
गच्छामि स्वपदं पदं तव भजामीति प्रयाति स्म सः ॥ ६ ॥

सानन्देनाथ नन्देन वृन्देन च निजेन सः ।
सार्कं गोकुलमापेदे चाम्बुजाक्षोऽम्बिकावनात् ॥७॥

तस्मिन् सङ्क्रीडमाने सह मुसलभृता कानने मानिनीभि-
श्चामा रामानुजाते रहसि धनपतेः किङ्करश्चन्द्रचूडः ।
स्त्रैणः स्त्रैणं यदासावहृत बत! तदा शौरिरेनं निहत्य
प्रत्याजह्रे तदेतच्छिरसि मणिमुदस्याग्रजायाददाच्च ॥८॥

ततश्च काश्चिदाच्छिदुरभुजबलगरिष्ठो दुष्टमतिररिष्टो नाम शिष्ट जनानिष्टकृदिष्टभृत्यः कंसस्य विष्टपपुष्टिनष्टीकरणकष्टक्लिष्टकर्मा धार्मिक-जनधर्मनिर्मूलनकर्मकर्मठः कठोरतरकण्ठनादकुण्ठितकण्ठीरवरवमुत्तुङ्ग-शृङ्गमुत्कटकटाहपरिणाहरूक्षाक्षं महोक्षरूपमुद्वहन्नधोक्षजमभिभवितु-कामो गोष्ठमधितिष्ठन्ति गोकुलानि व्याकुलानि कुर्वन् दुर्वारगुर्वहङ्-कृतिरुर्वरातलं खरतरखुरमुखविखण्डितं वितन्वन्नभीतिर्भुवंश [illegible]भी-याय मायाप्रधानो महासुरवरिष्ठः ॥

दुट्ठं रुट्ठं च रिट्ठं वुसहवरतणुं गोट्ठमाविट्ठमग्गे
दिट्ठं दिट्ठंतमेणं गमइदुमुवगत्तूण सत्तूण मित्थम् ।
सिंगे संगहिऊण क्खणमअळमहातुंगमंगं तदो सो
भूपट्ठे पिट्ठवंतो विदळइ सदहा साहु णं माहवो सो ॥९॥

[दुष्टं रुष्टं च रिष्टं वृषभवरतनुं गोष्ठमाविष्टमग्रे
दृष्टं दिष्टान्तमेनं गमयितुमुपगम्य शत्रूणां मित्रम् ।
शृङ्गे सङ्गृह्य क्षणमचलमहातुङ्गमङ्गं ततोऽसौ
भूपृष्ठे पिष्टवानविदलच्छतधा साध्वेनं माधवोऽसौ ॥]

अरिष्टघाती जगतां त्रयाणा-
मरिष्टतातिं कृतवान् मुकुन्दः ।

वृषप्रमाथेन वृषप्रमोदं
वृषस्थितिं चाधित विश्वलोके ॥ १० ॥

कालेऽस्मिन् कलहप्रियो मुनिवृषा वीणारतो नारदः
कंसं प्राप्य जगाद किञ्चिदमुना सम्यक् समाराधितः ।
देवक्यास्तनयोऽष्टमस्तव रिपुः श्रीकृष्णनामा शिशुः
पुष्णाति व्रजवाटसीमनि यशोदायास्तनूजोऽभवत् ॥ ११ ॥

आनकदुन्दुभिरेनं प्रसूतमात्रं निगूढमादाय ।
सपदि यशोदामनयत् त्वद्भीतस्तत्सुतां च निजपत्नीम् ॥ १२ ॥

भवताधिशिलं निहतापि जवाद्
दिवमुत्पतिता जगतां जननी ।
भवतोऽयमरिर्निरदिक्षदसौ
भवतोदहरो हरिरेव सताम् ॥ १३ ॥

इत्थं तस्य मुनेर्निशम्य वचनं क्रुद्धः स हन्तुं निज-
स्यालं तद्गृहिणीं च खड्गलतिकामुत्कृष्टवान् कोशतः ।
शान्तं शान्तमिदं तु साहसमिति स्वान्ते शमं लम्भितः
संरम्भी मुनिनैव तेन विरतः कंसोऽथ हिंसोद्यमात् ॥ १४ ॥

तदैव वसुदेवं च देवकीं च महाखलः ।
बबन्ध शृङ्खलेनासौ नारदश्च प्रयातवान् ॥ १५ ॥

कंसेन प्रहितोऽथ दुष्टदनुजः केशी सुकेशीजनैः
क्रीडन्तं तमनन्तमात्मभवने सन्तं निहन्तुं तदा ।
तुङ्गं जङ्गमनीलशैलतुलितं तौरङ्गमङ्गं वह-
न्नङ्गारातिपिशङ्गनेत्रमविशद् गोष्ठं गरिष्ठाकृतिः ॥ १६ ॥

दीहप्पोहगुहंतरुग्गअमहाहेसाहिभीसाविअ-
 क्खोणिव्वोमअरो खुरक्खअंधरापट्ठो धराहंगओ ।
उद्धुद्धूअसडाकडप्पविअळिज्जंतब्भमुब्भामिरो
 दुट्ठो गोट्ठपअं धुणाइ कुहणाबाहो महादाणवो ॥ १७॥

[दीर्घप्रोथगुहान्तरोद्गतमहाहेषाधिभीषित-
 क्षोणीव्योमचरः खुरक्षतधरापृष्ठो धराभङ्गदः ।
ऊर्ध्वोद्धूतसटासमूहविदलदभ्रमुद्भ्रमन्
 दुष्टो गोष्ठपदमधुनोत् कुहनावाहो महादानवः ॥]

तं च सञ्चलितसकलगोकुलं सञ्चरन्तमतइतश्चञ्चलबालदण्ड-चामरडामरविग्रहं विग्रहार्थमापतन्तं निग्रहीतुमुग्रमुग्रसेनापत्यकिङ्कर-मशङ्कमभिसरन् पङ्कजलोचनः करतलयुगळेन तच्चरणयुगळमुपसङ्गृह्ण-न्नुद्धृत्य चक्रभ्रमणपूर्वकं धनुःशतावधि दूरमुच्चकैः समुच्चिक्षेप ।

दूरक्षिप्तोऽपि क्रूरहेषारवभयङ्करप्रोथविवरनिगीर्णगगनतलः स-त्वरमभिजगाम ।

व्यादीर्णे मुखगह्वरेऽस्य विदलद्दन्तौघमन्तर्निजं
 बाहुं दक्षिणमाक्षिपत् परिघवद्दीर्घं स दामोदरः ।
तेनाथ स्फुटबृंहितेन विहतश्वासोद्गमं तद्बलं
 वीरो दारयति स्म मारयति च स्मैनं महाविक्रमः ॥ १८॥

केशितुरङ्गमनिधनात् क्लेशमपाकुर्वतोऽस्य सर्वेषाम् ।
केशव इति नामाभूत् पेशलमिन्द्रादिभिर्गीतम् ॥ १९॥

दृष्ट्वा केशिवधं प्रहृष्टहृदयः श्रीनारदः श्रीपतिं
 तुष्टाव द्रुतमेत्य गूढमवदच्चोदन्तमागामिनम् ।

कंसध्वंसमुरप्रमाथनरकव्यापादचेदीश्वर-
च्छेदप्रायममुष्य दिव्यदृगथ प्रीतश्च यातो मुनिः ॥ २० ॥

कदाचिद् गोपालाः सहलिहरयोऽक्रीडिषुरमी
गवां चोराः केचित् कतिचन गवां पालनपराः ।
अमेषायन्तैके सकुतुकममीषां कतिचन
प्रमोषायोद्योगं निभृतमभिनिन्युश्च पशुपाः ॥ २१ ॥

व्योमाख्यो व्योमचारी मयसुतहतकः कोऽपि मायाप्रगल्भो
गोपो भूत्वा मुमोष स्वयमपि पशुपान् मेषवेषानशेषान् ।
मुष्टान्मुष्टांश्च दुष्टः पशुसमजमपि क्षोणिभृद्गह्वरान्त-
र्नीत्वा नीत्वा रुरोध व्यधित च शिलया तन्मुखं दुर्मदान्धः ॥

तत्र द्वित्रावशिष्टेष्वथ पशुपशुपेष्वच्युतो दुश्चरित्र
शत्रोर्विज्ञाय विज्ञः स्वयममुमचिरादग्रहीदग्रहस्ते ।
त्रस्तं चैनं विहस्तं धृतनिजवपुषं मुष्टिघातैरहिंसी-
दाजह्रे चाद्रिरन्ध्रादपकलितशिलाबन्धनाद् बन्धुवर्गम् ॥२३॥

कंसः संसदि मन्त्रिणामचकथद्यन्नारदेनोदितं
तत्त्वं केशवसीरिणोः स्वनिधनायोद्भूतयोरेतयोः ।
अस्माकं च मनोरथं शृणुत भो! रामं च कृष्णं च ता-
वस्मद्द्रोहरतौ स्वबन्धुभिरमी यद्घातयिष्यामहे ॥ २४ ॥

चाणूरो मुष्टिकश्च प्रबलबलयुतौ मत्प्रियौ मल्लवीरा-
वम्बष्ठश्चातिधृष्टः स खलु कुवलयापीडदन्तावलश्च ।
सन्त्येते बन्धवो मे बहव इह महाविक्रमास्तैः समस्तै-
र्घानिष्येते पृथग्वा यदुकुलपृथुकावत्र चेदेष्यतस्तौ ॥ २५ ॥

सरामं तं कृष्णं सपदि मथुरामन्दिरमिदं
समानेतुं सम्प्रत्यविकलमुपायोऽयमुचितः ।
धनुर्यागं नाम स्फुटमिह महं साम्प्रतमहं
समारप्स्ये तौ तु ध्रुवमिह भवेतां कुतुकिनौ ॥ २६ ॥

चापयज्ञापदेशेन प्रापयामि स्वसन्निधिम् ।
चापल्यशालिनौ बालौ साफल्यायेप्सितस्य मे ॥ २७ ॥

स क्रूरो नरपतिरित्युदीर्य मोहा-
दक्रूरं सपदि समाजुहाव गेहात् ।
सम्भाव्य प्रसभममुं करे गृहीत्वा
संवेश्य स्वसविध एव सम्बभाषे ॥ २८ ॥

गच्छ त्वं गान्दिनेय! त्वरिततरमितो नन्दगोपस्य वेश्म
स्वच्छन्दं तत्र गोत्रापरिचरणपरौ ब्रूहि तौ रामकृष्णौ ।
भोजक्ष्मावासवेन स्वयमिह मथुरामन्दिरे चापयज्ञः
प्रारब्धः स्फारवीरव्रतविधिरधुना वीक्षणीयो ह्ययं वाम् ॥ २९ ॥

कियच्चिरं त्वामहमेष माधव!
स्वसुर्दिदृक्षे स्वसुतं हितं हि तम् ।
स्तुवन्ति सन्तो यदुदन्तमद्भुतं
नवं नवं नन्दज! नन्दितं सुरैः ॥ ३० ॥

एवमादि कर्णप्रियङ्करैर्वर्णैर्वर्णयन्ननुनीय साग्रजं सर्वगोप-गोपीसमग्रं सनन्दगोपं च नन्दनन्दनं स्यन्दनमारोप्य मन्देतर-मिमं देशं प्रापय गान्दिनेयेति चिकीर्षितबहुविधव्याजेन भोजेन सादर-

मभ्यर्थितश्चक्रधरवक्त्रारविन्दसाक्षात्करणसाभिलाषमतिरक्रूरो निष्क्रमितुमाशु प्रक्रमते स्म ।

रोहंतो संदणं तो सविणअहिअओ णंदणो गंदिणीए
सोहंतो वाहसंचोअणविहिपडुणा पग्गहेणग्गहत्थे ।
सोहं विण्हुत्ति भत्तिप्पवणसिवमणो भाविअब्बह्मतत्तो
तत्तो ठाणादु पट्ठाइ स पहरिसदो वड्ढिओ गोट्ठहुत्तं ॥ ३१ ॥

[रुहन् स्यन्दनं तदा सविनयहृदयो नन्दनो गान्दिन्याः
शोभमानो वाहसञ्चोदनविधिपटुना प्रग्रहेणाग्रहस्ते ।
सोऽहं विष्णुरिति भक्तिप्रवणशिवमना भावितब्रह्मतत्त्व-
स्ततः स्थानात् प्रास्थित स प्रहर्षाद्वर्धितो गोष्ठाभिमुखम् ॥

श्रीमत्कालकलायकायसुषमं कण्ठस्फुरत्कौस्तुभं
श्रीवत्साङ्कितवन्यदामतुलसीहारोल्लसद्वक्षसम् ।
राजत्पीतपटीदृढीकृतकटीचञ्चन्मणीकाञ्चिकं
राजीवायतनेत्रमिन्दुवदनं द्रक्ष्यामि लक्ष्मीपतिम् ॥ ३२ ॥

उत्तंसीकृतकेकिपिञ्छपटलस्निग्धोल्लसत्कुन्तलं
मुग्धस्मेरमुखारविन्दविहरद्भृङ्गायितापाङ्गकम् ।
बन्धूकद्युतिबन्धुराधरदलव्यासक्तवंशीलतं
बालं बालतमालनीलवपुषं द्रक्ष्यामि लक्ष्मीपतिम् ॥ ३३ ॥

मन्दं नन्दगृहाङ्गणे मणिलसन्मञ्जीरमञ्जुस्वर-
स्पन्दस्पन्दमनोज्ञपादयुगलीविन्यासधन्योत्तरम् ।
सञ्चारं कलयन्नमन्तिकचरैर्गोपालबालैः समं
कञ्चिद् ब्रह्म सविग्रहं शिशुमहं द्रक्ष्यामि लक्ष्मीपतिम् ॥३४॥

दुग्धं गा दुहतीषु मुग्धहसितस्निग्धाननेन्दुं मुदा
मुग्धस्त्रीषु गृहीतरत्नचषकं पाणौ चरन्तं मुहुः ।
दत्तं दत्तममूभिरेभिरसकृत् पीत्वापि याच्ञापरं
कृष्णं तृष्णजमद्भुतार्भकमहं द्रक्ष्यामि लक्ष्मीपतिम् ॥३५॥

इत्थमादिभिर्मनोरथशतैर्विनोदितान्तरात्मा पद्मनाभमयमानन्दामृतमयमखण्डब्रह्माद्वैतमयमात्मानमनुभवन् अविदिताक्रान्तपद्धतिरविलम्बितमतिलङ्घितागिरिसरिदरण्यजनपदप्रदेशान्तरः क्रमेण गोष्ठपदनेदिष्ठभुवमाढौकिष्ट हृष्टधीर्गान्दिनीतनूजः ।

अत्र क्रीडितमीडितेन मुनिभिः श्रीगोपबालेन य-
द्धात्रीरेणुषु शङ्खचक्रकलशच्छत्रादिरेखाङ्किता ।
उत्तंसच्युतपुष्परेणुमकरन्दानन्दितेन्दिन्दिरा
पादाब्जप्रतिबिम्बसन्ततिरियं तस्यैव सन्दृश्यते ॥ ३६ ॥

इति रथादवरुह्य महीतले
विलुठति स्म तदङ्घ्रिपदाङ्किते ।
शिरसि चार्पयति स्म कराञ्जलि-
प्रणिमितानि च तानि रजांसि सः ॥ ३७ ॥

लोष्टैः कल्पितमर्भकेण कुहचित् क्रीडागृहं कृत्रिमं
पर्यन्तेषु च वालुकाविरचितप्राकारमेकाग्रधीः ।
दृष्ट्वा स स्म मुहुः प्रदक्षिणयति श्रीकृष्ण विष्णो हरे!
गोविन्देति ननाम नामशतमप्युच्चैः समुच्चारयन् ॥ ३८ ॥

प्रत्यासन्नमियेश्वरास्पदमसावद्यैव दर्शिष्यते
प्रत्याख्यास्यति कंसदूत इति मां किन्वेष नन्दात्मजः ।

यद्यन्तश्च बहिश्च सर्वजगतां व्याप्तः स विष्णुः कथं
मद्भक्तिं न विदाङ्करोतु विचिकित्सा मे वृथैवेदृशी ॥ ३९ ॥

व्याजो भोजपतेर्धनुर्यजनमित्यात्मद्रुहो ज्ञायते
येनास्मै विभवे मया पुनरयं कस्मादपह्नोष्यते ।
रात्री रात्रिरिति स्वनेत्रयुगलं सम्मील्य यो जल्पति
प्रत्यक्षस्फुरदर्कभासि दिवसे प्रत्येति कस्तद्गिरम् ॥ ४० ॥

अये ! किमस्ताचलमस्तकाभिमुखमवतरति भगवान् गभस्तिमाली । तथाहि,

अस्तक्ष्माभृदधित्यकापरिगलद्धातुद्रवार्द्रैरिव
प्रत्यासन्नवियोगकोकतरुणीशोकाग्निलग्नैरिव ।
आताम्रैः किरणोत्करैरवतरत्याशामसौ वारुणी-
माश्लेषव्यतिषक्तरक्तनलिनीचिह्नैरिवाह्नां पतिः ॥ ४१ ॥

तदहमसितमेघश्यामलश्रीमदङ्गं
कमपि मनुजबालं कम्रकान्तिप्रवाहम् ।
स्फटिकधवलदेहं कञ्चिदन्यं च धन्यं
जनमनु ननु कुर्वे जन्मसाफल्यमक्ष्णोः ॥ ४२ ॥

आरोहंतो रहं तो सुमहिअमवहोवासगोवाळएहिं
राअंतं राअमग्गं पविसिअ स णिअं संचरतो ससंतो ।
संझाअं विंझसेळप्पडिमबहुमहासोहसोहंतमज्झं
संझाअंदो मुउंदं पसुववरघरं गाहए गंदिणेओ ॥ ४३ ॥

[आरोहन् रथं ततः सुमहितमुभयवासगोपालकै
राजमानं राजमार्गं प्रविश्य शनैः सञ्चरन् श्वसन् ।

सन्ध्यायां विन्ध्यशैलप्रतिमबहुमहासौधशोभमानमध्यं
सन्ध्यायन् मुकुन्दं पशुपवरगृहमगाहत गान्दिनेयः ॥]

गोदोहव्यापृतानां पशुपमृगदृशां सञ्चये सञ्चरन्तौ
मोदोद्रेकप्रफुल्लाननसरसिरुहौ नीलपीताम्बराढ्यौ ।
मुक्तागौरेन्द्रनीलासिततनुसुषमौ सुन्दरौ गान्दिनेयो
मुक्ताध्वक्लेशमालोकत विनतजनक्षेमदौ रामकृष्णौ ॥ ४४ ॥

ससम्भ्रमं च रोमाञ्चकञ्चुकितसर्वाङ्गः सम्प्रहर्षाश्रुवर्षसमाच्छादितलोचनः सहसा स्यन्दनादवतीर्य त्वरापारवश्यस्खलितपदविन्यासमुपगम्य सम्यगवनतः त्रिः प्रदक्षिणीकुर्वन्नुर्वरातले दण्डपातं पतितः साष्टाङ्गं प्रणनाम रामकेशवौ रचिताञ्जलिर्मुहुर्मुहुर्महानुभावो भक्तजनोत्तंसरत्नमक्रूरो नाम यादवप्रवीरः ।

रामो वाममसुष्य पाणिकमलं लक्ष्मीपतिर्दक्षिणं
सामोदं परिगृह्य तं सपदि तावुत्थापयामासतुः ।
प्रत्येकं परिमर्दहृद्यवनमालामोदिना वक्षसा
भक्तिप्रह्वमुखं मुहुर्मुहुरमुं पर्यष्वजेतामुभौ ॥ ४५ ॥

कच्चित् स्वागतमङ्ग! मङ्गलगुणासङ्गेन तुङ्गस्य ते
मच्चित्ताम्बुजमुच्छ्वसित्युपगमादार्यस्य ते सूर्यवत् ।
भद्रं किं मधुरापुरं समवतो मातुः सगर्भस्य मे
मद्द्रोहार्थममुष्य मातरपितृद्रोहः क्रियार्था क्रिया ॥ ४६ ॥

शार्दूलेन समं महीध्रविवरे वासः पशूनां यथा
युष्माकं तु तथैव तत्र नगरे कंसेन साकं स्थितिः ।

अग्रेर्दुष्टमहीपतेर्दुरभिलाषारब्धमूर्तेः स्त्रिया
दुर्दान्तद्विरदस्य चाशु परिहर्तव्या समीपस्थितिः ॥ ४७॥

अस्तु तावत्। अवसितवस्तुविस्तारप्रस्तावेन कृतं कृतम्। इतस्तावदागम्यताम्। अतिदवीयस्तरसरणिपरिचङ्क्रमपरिश्रान्तेन भवता विश्रम्यताम्। अस्मदास्पदमिदमलङ्क्रियताम्। अमलकमलामोदमेदस्विना नभस्वता तव स्वेदबिन्दवोऽपनीयन्ताम्। अतुच्छकच्छपादपच्छटाच्छदसमाच्छादितार्ककिरणप्रसरे सरस्सलिले सरसि निमज्ज्यताम्। अलङ्क्रियतां च प्रत्यग्रधौताम्बरगन्धमाल्यादिभिरात्मशरीरम्। आज्यगुळदधिमधुप्राज्यरसभोज्यवस्तुपरिग्रहेणानुगृह्यतामस्मद्विभूतिः। अतिमधुरशर्करापरिमिश्रितश्रापितमुग्धदुग्धपायिना च हंसतूलमृदुलपर्यङ्कशायिना निद्रासुखं च समाद्रियतामद्यतनीं निशाम्। श्वोभूते च सर्वमपि कार्यं विचार्यमार्येण। इति सादरमभिदधानो गदाग्रजः साग्रजः तमक्रूरमन्तः प्रवेशयामास।

वंदंतो णंदगोवं भणइ पुण हरी गंदिणेओ खु एसो
मित्तं णो सुद्धसीळो सुगुणगणणिही भोअराअस्स दूओ।
पत्तो णो वत्तुकामो किळ खळमइणो माउळस्स त्ति मण्णे
संदेसं ताद! मंदेअरमिममहुणा साहु संमाणएहि ॥ ४८॥

[वन्दमानो नन्दगोपमभणत् पुना हरिर्गान्दिनेयः खल्वेष
मित्रं नः शुद्धशीलः सुगुणगणनिधिर्भोजराजस्य दूतः।
प्राप्तो नो वक्तुकामः किल खलमतेर्मातुलस्येति मन्ये
सन्देशं तात! मन्देतरमिममधुना साधु सम्मानय ॥]

ततश्च नन्दनस्य प्रियसुहृदिति नितान्तस्नेहविस्रम्भेण कृतपरिरम्भेण सम्भावितो नन्दगोपेन गान्दिनीनन्दनो नन्दनीयनय-

विनयगुणसमग्रः साग्रजेन नन्दात्मजेन यथोक्तपारचर्याक्रमेण सम्भावितस्तं रात्रिशेषमशेषसुखपदार्थसार्थकृतार्थमतिरतिगमयामास ।

उत्थाय प्रातरित्थं पशुपवरपुरो वाचमक्रूर ऊचे
कंसेन प्रेषितोऽहं खलु खलजनतासार्वभौमेन सत्यम् ।
चण्डः कोदण्डयज्ञं कमपि किल समारब्धवानात्मगेहे
गेहेनर्दी स सम्मर्दितुमभिलषति श्रीधरैकाश्रयान् वः ॥४९॥

कोदण्डाध्वरदीक्षितः स नृपतिस्तत्रर्त्विजः सन्त्यमी
चाणूरश्च स मुष्टिकश्च स महामात्रः स कुम्भीश्वरः ।
चत्वारः स्वयमत्रियन्त यजने सङ्ग्रामरूपां क्रिया-
माधातुं फलमिच्छता जळधिया शौरेर्दिवः प्रापणम् ॥५०॥

अघासुरो बकासुरः प्रलम्बकेशिपूतनाः ।
यया दिशा गताः शठस्तया यियासति ध्रुवम् ॥५१॥

धनुर्मखं द्रष्टुमशेषवल्लवैः
समं स रामः सहदेवकीसुतः ।
सनन्दगोपो मथुरामुपाव्रजे-
दिति व्रजाधीश ! स मामजीहपत् ॥५२॥

मुणे(ह?हि) कज्जस्स सरीरमेरिसं
जहिं खु पाणाअइ विप्पलंभणं ।
वएह तुह्मे ण वएह वा तहिं
विहीणिसेहो वि ण दूअकत्तओ ॥५३॥

[जानीहि कार्यस्य शरीरमीदृशं
यत्र खलु प्राणायति विप्रलम्भनम् ।

व्रजेत यूयं न व्रजेत वा तत्र
विधिर्निषेधोऽपि न दूतकर्तव्यः ॥]

सन्देशो भोजभर्तुः समयसमुचितः कोऽत्र सन्देहलेश-
स्तं देशं द्रष्टुकामा वयमपि जनिता यत्र मातापितृभ्याम् ।
धानुष्कानुग्रहार्थः स खलु मखविधिः साधु सम्भावनीयः
स्थाने मानी समाज्ञापयति शिशुकृपासङ्कुलो मातुलो नः ॥५४॥

आर्य! स्थैर्यमनुज्झताऽत्रभवता शास्त्रोक्तशास्त्राध्वर-
क्षात्रश्रोत्रियधर्ममर्मविदुषा राज्ञः समज्ञावतः ।
आज्ञा प्राज्ञतमेन नेयमवमन्तव्या तदव्याकुला
गच्छामो वयमच्छलेषु न फलेदस्मासु तस्य छलम् ॥५५॥

इति मतिमतो महानुभावस्य भगवतो भवद्भाविभूतार्थप्रत्यक्ष-वीक्षिणः साक्षिणश्च सर्वकर्मसु साक्षाद्भूय स्थितस्य परमात्मनोऽभिमत-मात्मनो विज्ञाय धनुर्यज्ञाय स्पृहयन्तो नन्दगोपहलधरप्रमुखास्तावद-भीरव आभीरवरिष्ठा गोष्ठवासिनो गरिष्ठशकटशतसमारोपितसकलपदा-र्थसार्थाः सबालवृद्धाः स्त्रीजनवर्जमस्मात् प्रदेशात् प्रस्थानाय प्रारभन्त ।

अग्रे सप्रग्रहोऽक्रूरः साग्रजोऽनु गदाग्रजः ।
मन्देतरमथारूढाः स्यन्दनं तममी त्रयः ॥५६॥

अक्रूरसूतमधिरुह्य रथं मुकुन्दे
मन्तुं व्यवस्यति ततोऽथ विवस्वतीव ।
वीतोरुसूतमतिदूरदिशं विलेपुः
शोकेन कोकवनिता इव गोपनार्यः ॥५७॥

अस्मानेष विहाय हा यदुपुरीमुद्दिश्य विश्वप्रियो
गन्तुं प्रक्रमते किल प्रियतमः प्राणादपि श्रीपतिः ।
सख्यः किं करवाम किङ्करशठः कंसस्य योऽक्रूर इ-
त्याख्यां क्रूरतरो बिभर्ति विपरीतार्थां स नेता हरेः ॥५८॥

पाणाणि प्फुडमम्मकाण मिहआसामो स दामोअरो
तं णेउं सअमागओ गअघिणो जोअं खु लोअंतरम् ।
मण्णे सो जमकिङ्करोदिकठिणो कंसस्स णो किंकरो
जेण कड्ढिअ णिट्ठिअस्स कुहइप्पच्छा ण पच्चाअमो ॥५९॥

[प्राणाः स्फुटमस्माकं मेघश्यामः स दामोदरः
तं नेतुं स्वयमागतो गतघृणो योऽयं खलु लोकान्तरम् ।
मन्येऽसौ यमकिङ्करोऽतिकठिनः कंसस्य नो किङ्करो
येन कृष्ट्वा निष्ठितस्य कुहचित्पश्चान्न प्रत्यागमः ॥]

मुग्धस्निग्धकटाक्षमक्षियुगळं सभ्रूलताविभ्रमं
कम्रं बिम्बफलारुणाधरदलं पूर्णेन्दुरम्यं मुखम् ।
मेघश्यामळकोमळं वपुरुरो विस्तारि हारोज्ज्वलं
पीतोदारदुकूलशालि जघनं मञ्जुक्वणन्मेखलम् ॥ ६० ॥

सङ्क्रीडन्मणिकङ्कणं कनदुरुस्वर्णाङ्गुलीयोपल
शोणं पाणियुगं प्रवाळमृदुळं कण्ठं च कम्बूपमम् ।
कञ्जाभं मृदुमञ्जुशिञ्जितमणीमञ्जीरमङ्घ्रिद्वय
तस्यैतानि हरेः कदा पुनरपि प्रत्यक्षमीक्षामहे ॥ ६१ ॥

माधुर्यादिगुणैर्मनोहरतमा माधुर्य एवाङ्गनाः
सौभाग्यं परमं परिग्रहवशाद्रक्ष्यन्ति लक्ष्मीपतेः ।

प्रत्येकं बहुमन्वतां पुनरमूः स्वं स्वं ततः का क्षतिः
किन्त्वस्मान् व्रजसुन्दरीः परिहसिष्यन्तीति दूयामहे ॥६२॥

दूयध्वं मा स्म यूयं यदि मदिरदृशस्तत्र माद्येयुराद्यः
सद्यो जह्यादमूरप्यपकृपमजितो रासकेळौ यथास्मान् ।
सत्यं सख्यस्तथापि क्व पुनरिह भुवां सिद्धिरस्मादृशीनां
दीनाभ्यो दीनबन्धुः पुनरपि भविता ताभ्य एव प्रसन्नः ॥ ६३ ॥

समदाः प्रमदा जह्याद् गृह्णीयाच्च स निर्मदाः ।
अस्तु काममिदानीं तु कस्मादस्मानुपेक्षते ॥ ६४ ॥

अक्रूरोक्तिर्न खलु घटते भोजराडाजुहाव
स्नेहादेताविति यदति हि द्वेषवानेष पापः ।
कृष्णे तृष्णातरळमतिभिर्माधुरीभिर्वधूभि-
र्मुक्तैनैव छलपटुधियानेन दूतेन भाव्यम् ॥ ६५ ॥

इमा हि कूरो ण परोत्ति से कआ
अवस्समक्कूरअसद्दपक्किआ ।
अघोरसद्दं जह घोरमुत्तिणो
सिवस्सवक्खाइ तहत्ति मण्णिमो ॥ ६६ ॥

[अस्मात् क्रूरो न पर इत्यस्य कृता
अवश्यमक्रूरकशब्दप्रक्रिया ।
अघोरशब्दं यथा घोरमूर्तेः
शिवस्य व्याख्याति तथेति मन्महे ॥]

रासक्रीडासु सख्यः स्मरत मरतकश्यामळश्रीमदङ्गं
हासश्रीसान्द्रचन्द्रातपविसरलसद्वक्त्रपूर्णेन्दुबिम्बम् ।

व्यासश्रीनारदादिप्रणतपदमपि प्रेयसीनाममुं नो
दासत्वेनाभिलाषप्रणयनकरुणासञ्जनं कञ्जनाभम् ॥ ६७ ॥

विधे! तव विधेदृशी कथमभूदभूतागसा-
मपाकृतकृपालवा पशुपयोषितां मण्डले ।
हितं जनमनञ्जनं प्रथममञ्जसा रञ्जय-
न्ननेन किमनेनसा विघटयस्यहो दूरतः ॥ ६८ ॥

हा कृष्ण माधव मुकुन्द हरे मुरारे
हा कञ्जनाभ करुणाकर वासुदेव! ।
कस्मादियं कठिनता समभूदकस्मा-
दस्मादृशीरिह विहाय यया प्रयासि ॥ ६९ ॥

धन्यास्ता वन्यमालिन् मधुहर मधुरामन्दिरे सुन्दराङ्ग्यः
सन्द्रष्टारस्सुखं यास्तव मुखमखिलानन्दचन्द्राभिरामम् ।
किञ्च त्वा पञ्चबाणप्रतिममतिमुदा गूढमागम्य गाढं
न्यञ्चन्मन्दारमालापरिमळसरसोरस्कमालिङ्गितारः ॥७० ॥

एवंप्रायैर्दीनदीनैर्विलापै-
राक्रन्दन्तीस्तारमाभीरनारीः ।
गोविन्देन प्रेषितः कोऽपि गोपो
वाचां गुम्फैस्सान्त्वयामास धीमान् ॥ ७१ ।

शृणुत सुदृशः सन्देशं वः प्रियस्य हरेरलं
गुणवतितमा मत्प्रेयस्यो मुधा परिदेवितैः ।
कथमहमुपेक्षिष्ये युष्मानसुप्रतिमा इमा
मम तु सुमहत्कार्यायत्तं क्षमध्वमुपक्रमम् ॥ ७२ ॥

मातुर्नः सहजस्य कंसनृपतेरादेशतो देशतो
ह्यस्मादल्पविदूरमेव मधुरागेहं प्रतिष्ठामहे ।
तावन्मात्रमवश्यसिद्धमसह किं वो वियोगव्रतं
विश्लेषं विषहन्त एव सवितुर्नक्तं नळिन्यो न किम् ॥७३॥

निस्तीर्य कार्यजलधिं द्रुतमागतोऽहं
निस्सीमनि प्रमदरूपसुधापयोधौ ।
निर्मज्जयामि भवतीर्भवतीव्रताप-
प्रध्वंसिनोति भगवानगदीन्मुकुन्दः ॥ ७४ ॥

इति तद्वचनवर्णामृतं कर्णशष्कुलीभिरापिबन्त्यो नितान्तप्रमोद-सिन्धुमवगाढाः प्रौढा गोपसीमन्तिन्यस्सीमन्तसमारोपितमुकुळित-करपङ्कजाः पङ्कजाक्षप्रयाणप्रदेशाभिमुखं प्रणम्य प्रियदूतमेनं प्रतिप्रस्था-पयामासुः ॥

अक्रूरस्यन्दनालङ्करणमनुययुर्नन्दगोपादयस्ते
रामं कृष्णं च सोमं मिहिरमपि यथा राशयोऽन्यग्रहाणाम् ।
गव्यादिद्रव्यजातं पृथुलघटकटाहादिषु प्राभृतार्थं
कंसस्य क्षिप्तवन्तो बहुशकटशते वल्लवा उल्लसन्तः ॥ ७५ ॥

ळहुअरमह सव्वे जंघिआ ळंघअंतो
बहुगहणधुणीओ तंपि संपत्तवंतो ।
कणअगिरिसिहाळीतुळ्ळंकळ्ळोळमाळा-
फिडिअतटतमाळं सूरकण्णाउ वेळम् ॥ ७६ ॥

लघुतरमथ सर्वे जाङ्घिका लङ्घयन्तो
बहुगहनधुनीः तामपि सम्प्राप्तवन्तः ।

कनकगिरिशिखाळीतुल्यकल्लोलमाला-
भ्रंशिततटतमालां सूर्यकन्याया वेलाम् ॥]

कळिन्दतनयासरित्तदनु काळियोन्मर्दना-
त्तदीयविषदूषितस्वजलशोधनाधायिनः ।
अथावतरतो रथादकृत पादशौचं हरे-
रपाययदपोऽपि तं कृतामिव स्मरन्ती हितम् ॥ ७७ ॥

तत्र च तरुणतमालकृतमालनक्तमालतालहिन्तालरसालनागपूगपुन्नागनाळिकेरकेसरप्रायतरुकदम्बकम्बळिते जम्बालरहिते कळिन्दनन्दिनीरोधसि गान्दिनीनन्दनः स्यन्दनमवस्थाप्य नन्दनन्दनं तदग्रजं च समग्रभक्तिविनयनम्रस्तत्र सुखेनोपवेश्य प्रणम्य स्वनियमविधानाय सावधानो यमुनाजलमवगाह्य तत्र समन्त्रस्नानमाचरति स्म॥

मग्नो वारिणि मन्त्रपूर्वमचिरादन्तर्जलं तं बलं
गोविन्दं च ददर्श मन्दहसितप्रोत्फुल्लवक्त्राम्बुजम् ।
आश्चर्यस्तिमितेक्षणः पुनरसावुन्मज्ज्य तत्रापि ता-
वीक्षामास रथे यथापुरमथ व्यस्मेष्ट हृष्टाशयः ॥ ७८ ॥

बुड्डंतो स पुणोवि वारिणि तहिं सेसाहितप्पेसअं
देवं देवमुणिंदवुंदपहळादादीहि जुट्ठं हरिम् ।
संखं पंकअसंगणंदअगआचक्कं च पक्खीसरं
संघं पारिसदाण पेच्छइ महिं ळच्छिं च पच्चक्खदो ॥ ७९ ॥

[मज्जन् स पुनरपि वारिणि तत्र शेषाहितल्पेशयं
देवं देवमुनीन्द्रवृन्दप्रह्लादादिभिर्जुष्टं हरिम् ।

शङ्खं पङ्कजशार्ङ्गनन्दकगदाचक्रं च पक्षीश्वरं
सङ्घं पारिषदानां प्रैक्षत महीं लक्ष्मीं च प्रत्यक्षतः ॥]

शेषाहितल्पशयनं नयनाभिरामं
तुष्टाव तुष्टहृदयो बहु गान्दिनेयः ।
श्रीपद्मनाभ जय माधव केशवेति
श्रीवल्लभं स पयसस्तरसोदमाङ्क्षीत् ॥ ८० ॥

किमसि हृषितलोमा वारिणश्शीतळत्वात्
किमु किमुत कुतो वाप्यद्भुतार्थावलोकात् ।
स्मितसुमधुरमित्थं माधवेनानुयुक्तो
जयति तव हि मायेत्यूचिवान् गान्दिनेयः ॥ ८१ ॥

रथारूढः प्रौढप्रमदभरपर्याकुलमना
मनागप्याख्यातुं न स पटुरचित्रीयत भृशम् ।
अभी(शूँषू)नुन्मुच्य द्रुतमथ तुरङ्गानगमयत्
समासेदुः सर्वे सपदि मधुरां नाम नगरीम् ॥ ८२ ॥

इति श्रीभागवतचम्पूप्रबन्धे
मधुराप्रवेशो नाम
पञ्चमः स्तबकः ॥

॥ षष्ठः स्तबकः ॥

उच्चतुङ्गैः सप्तभूमैर्मणिकनकघृणिश्रेणिमिश्रैरदभ्रैः
शुभ्रैरभ्रङ्कषाग्रैरुपरिपरिचलच्चित्रनानापताकैः ।
सौधैः सौवर्णवातायनविवरसरत्पौरनारीकटाक्ष-
च्छायाश्यामावकाशैः सुरुचिमविशतां स्वां पुरीं रामकृष्णौ ॥१॥

गान्दिनीसुतकरद्वयस्पृशौ
स्यन्दनाद् द्रुतमधोऽवतेरतुः ।
तावुभावपि यदा तदा रवि-
श्चाम्बरादवततार वारुणीम् ॥ २ ॥

तत्र चानुमिळितेन नन्दादिवृन्देन सह मन्दानिलचालितमाकन्द-कुन्दमन्दारसिन्दुवारकुसुममकरन्दस्यन्दसान्द्रामोदसुन्दरे मन्दिरबाह्य-निष्कुटपुष्करिणीतटप्रदेशे विकटघटितविविधपटकुटीशतेषु शकटशता-वतारितशाकफलमूलदधिघृतक्षीरतण्डुलकदळीदळगुळगोधूममाषमुद्गकुल-त्थादिपदार्थसार्थेषु तत्र तत्र विरचितचुल्लीकेषु वल्लवेषु तावदोदनपाक-जागरूकेषु मोदकापूपाचिपिटलाजानिर्माणप्रवृत्तेषु च केषुचिदपरेषु कश्चि-त्पुकम्बळधवळप्रच्छदपटोपधानादिशयनपरिच्छदप्रस्तरणसत्वरेषु तत्त-द्व्यञ्जनपाकसञ्जानितसुगन्धबन्धुरेषु रन्धनस्थलेषु सन्ध्योपासनतत्परेषु च विप्रसमूहेषु साग्रजः स गदाग्रजस्तावदक्रूरं हस्ते गृहीत्वा 'भद्र गच्छ स्वपुरमेव प्रातस्तरामागच्छ च वयं तु निशीथिनीमिमामत्रैव विहित-शार्वराशनशयना गमयिष्यामः। किन्त्ववसितकार्या एव भवद्भवनमाग-मिष्याम' इति सादरमेनं प्रस्थाप्य स्वस्थमतिरत्रैव सुखमासाञ्चक्रे चक्रपाणिः ॥

शरज्ज्योत्स्नाशुभ्रं क्वचन सिचयागारमविशदु
विशालं विश्वेशो विततविमलक्षौमशयनम् ।
शयानस्तत्रासावुरगवरपर्यङ्कसुभगं
निजं श्वेतद्वीपं ननु तमनुसस्मार भगवान् ॥ ३ ॥

अक्रूरं प्रातरभ्यागतमथ पुरतःकृत्य कृत्यञ्च नित्यं
कृत्वा नत्वा च रामं नगरवरनिरीक्षोत्सुको वासुदेवः ।
विस्तीर्णां राजवीथीमलमलमकरोदात्मनासौ तृतीयो
भागद्वन्द्वोच्चसौधस्थितपुरतरुणीपुष्पवृष्टीः प्रतीच्छन् ॥ ४ ॥

धण्णा गोवंगणाओ मुणह मणहरं वंमहादो वि जाओ
कण्हं णं तंबबिंबाहरमहुरमुहं कम्मकंदोट्टवण्णम् ।
अण्णाणं दुळ्ळहं णो णिअहिअअहिअं वळ्ळहं ही ळहंते
पुण्णाणं पुण्णदाए त्ति खु पुरवणिदा णं मिहो वण्णअंति ॥५॥

[धन्या गोपाङ्गनाः जानीथ मनोहरं मन्मथादपि याः
कृष्णमेनं ताम्रबिम्बाधरमधुरमुखं कम्रनीलकमलवर्णम् ।
अन्यासां दुर्लभं नो निजहृदयहितं वल्लभं ही लभन्ते
पुण्यानां पूर्णतया इति खलु पुरवनिता नूनं मिथोऽवर्णयन् ॥]

तासां प्रासादवातायनविवरशतैरापतद्भिर्विलास-
स्निग्धैर्मुग्धैरुदश्चत्तरशितिमजितभ्रान्तभृङ्गैरपाङ्गैः ।
तुङ्गैरालिङ्गिताङ्गौ विकचकुवलयस्रग्गुणौघैरिवास्ता-
मेकश्यामश्रियौ तावसितासितरुचावप्यहो कृष्णरामौ ॥ ६ ॥

लाजैः कृष्णं ववृपुरबलास्तारहारावदातै-
स्तज्ज्यायांसं कुवलयदलैः स्निग्धभिन्नाञ्जनाभैः ।

सर्वश्वेतः समजनि हरिः सर्वकृष्णश्च रामः
तद्द्रष्टारः सुभृशमभवन् विस्मिताः सस्मिताश्च ॥ ७ ॥

सम्भाण्ड्य धौतसिचयप्रचयं करभ्या
संवाहयन् करतलोद्धृतदण्डकाष्ठः ।
ताभ्यामलक्षि रजको बलकेशवाभ्या-
मभ्याव्रजन् सपदि कश्चन राजमार्गे ॥ ८ ॥

इच्छामो वयमच्छवस्त्रनिचयं भद्र! प्रयच्छेति तं
पृच्छन्तं हरिमुच्चकैरुदितवानुच्चण्डकोपो भटः ।
किं भो डिम्भक! राजकीयवसनं धिग्धिङ्मुधा याचतो
जिह्वां ते सपदि छिनद्मि न सहे सोऽहं प्रभोः किङ्करः ॥ ९ ॥

मलिनपटच्चरखण्डं संवस्त्रयितुं शिशुः समुचितस्त्वम् ।
राज्ञो राज्ञीनामपि परिधार्यं दिव्यवसनमिच्छसि ही ॥ १० ॥

इत्यवधीर्य निर्यातुमुपक्रममाणस्य खलनृपतिकिङ्करतया कर्णेजपस्य निर्णेजकस्य कण्ठं नखशिखरेण विलुण्टन्नकुण्ठब्रह्मण्यात्मनि संयोजयन्नेनमतिधवळतया शुचितया चात्मयशःप्रसरसदृशानि तानि वासांस्यपहृत्यात्मनश्चाग्रजस्यान्येभ्योऽपि गोपमहत्तरेभ्यो विभज्य प्रतिपादयामास महानुभावो वासुदेवः ।

ततश्च कश्चिद्वायको विश्वनायकममुं विज्ञाय विज्ञाननिधिः शैलेयमृगनाभिप्रायपरिमळद्रव्यण भव्यतरविचित्रवेषपरिपोषमनयोः परिकल्पयामासाकल्पकल्पविज्ञो महाप्राज्ञः तस्मै च हितमात्मपदलाभमन्याश्च धन्या विभूतीरर्पयामास जगत्पतिरनल्पकृपामृतसरित्पतिहरित्पतिवन्द्यपादारविन्दो नन्दनन्दनः ॥

मुदा मुकुन्दः सह सीरपाणिना
सुदामनाम्नो गृहमभ्युपेयिवान् ।
तदा स मालाकृदकालवृष्टिव-
त्तदागमात्तुष्टिमवाप भक्तिमान् ॥ ११ ॥

पूजामाधाय पुष्पान्तरमधुपर्कार्घ्यपाद्यासनाद्यैः
पूर्णानन्दस्वधाम्नोर्मुसलिमुरजितोर्मुक्तिकामः सुदामा ।
नानापुष्पैर्विचित्राः सुरभिभिरनघैराशु निर्माय मालाः
स्वेनैवालश्चकार प्रमुदितमनसोरेनयोरङ्गमङ्गम् ॥ १२ ॥

णमंतं णुवंतं च णं भत्तिमंतं
रमावळ्ळहो दुळ्ळहो दुण्णआणम् ।
समिद्धिं च भत्तिं च मुत्तिं च भुत्तिं
समत्थं दिसंतो णु गह्णाइ कह्णो ॥ १३ ॥

[नमन्तं नुवन्तं चैनं भक्तिमन्तं
रमावल्लभो दुर्लभो दुर्नयानाम् ।
समृद्धिं च भक्तिं च मुक्तिं च भुक्तिं
समस्तं दिशन्नन्वग्रहीत् कृष्णः ॥]

परिक्रामन्नस्माद् द्रुतमथ सुदाम्नो निलयनात्
त्रिवक्रामद्राक्षीदधिसृति सरामो मधुरिपुः ।
स कुब्जामब्जास्यां घुसृणचषकालङ्कृतकरा-
मराळाङ्गीमूच मदकलमरालालसगतिम् ॥ १४ ॥

कासि त्वं सुमुखि ! क यासि किमिदं हस्तारविन्द्रे च ते
सैरन्ध्रयास्मि नृपाय कुङ्कुमामिदं दातुं प्रयास्याम्यहम् ।

अङ्ग त्वं पुनरङ्गरागमनघं किं मे प्रदास्यस्यमुं
गात्रं पात्रममुष्य कस्य भवतो भिन्नस्य तद् गृह्यताम् ॥ १५ ॥

सरसमित्यनया प्रतिपादितं
सुरभिकुङ्कुममाददता मुदा ।
मुरजितालमकारि निजं वपुः
मुसलिनश्च सलीलमथामुना ॥ १६ ॥

अङ्गरागघुसृणानुलेपना-
दम्बुजाक्षहलिनौ विरेजतुः ।
सान्ध्यसूरकिरणोपरञ्जिता-
वञ्जनस्फटिकपर्वताविव ॥ १७ ॥

पादाववष्टभ्य पदाम्बुजाभ्यां
कराङ्गुलिभ्यां चिबुकं प्रगृह्णन् ।
कुब्जामिमां कुङ्कुमदामुदारा-
मृज्वीमकार्षीदरविन्दनाभः ॥ १८ ॥

गात्रं वक्रचरं यदा हरिरृजूचक्रे मृगाक्ष्यास्तदा
तां प्रत्यात्मधनुर्जवादृजुचरं वक्रीचकाराङ्गजः ।
व्रीळावेपथुघर्मलेशपुलकासङ्गादिशृङ्गारिणी
मा मा माननुगृह्य गाः सुपुरुषेत्याभाषतासावमुम् ॥ १९ ॥

कतिपयदिवसान्तरे सरोज-
प्रतिमचलाचललोचने जनोऽयम् ।
तव सविधमुपेष्यतीति तुष्य-
न्नवददिमामगमच्च वासुदेवः ॥ २० ॥

साहं तो हळिणा सरोअणअणो सो माहुरं गोउरं
 गाहंतो बहुमाणदिण्णसरणी रक्खाभडेहिं खणम् ।
पेक्खंतो सअमुच्चसोहमणिपाआरं णिअं मंदिरं
 सच्छंदं खु कुअंडमंडवमहो वाहेइ ताहे सुहम् ॥ २१ ॥

[सार्धं तदा हलिना सरोजनयनोऽसौ माधुरं गोपुरं
 गाहमानो बहुमानदत्तसरणी रक्षाभटैः क्षणम् ।
पश्यन् स्वयमुच्चसौधमणिप्राकारं निजं मन्दिरं
 स्वच्छन्दं खलु कोदण्डमण्डपमहोऽवहत्तदा सुखम् ॥]

मणिकनकसमाश्रितोरुमञ्च-
 प्रणिहितमुल्बणधूपदीपजुष्टम् ।
अरहितबहुगन्धमाल्यमग्रे
 हरिरनघं धनुरेतदालुलोके ॥ २२ ॥

चण्डं कौ दण्डदण्डं निजभुजयुगलेनाददानस्तदानीं
 मा स्प्राक्षीरध्वराराधितमिदमिति तद्राक्षिभिर्वारितोऽपि ।
सज्यं कृत्वा समास्फाल्य च मुरमथनो मुष्टिपीडं विकर्ष-
 न्नुग्रप्रध्वानविक्षोभितभुवनमसाविक्षुभञ्जं बभञ्ज ॥ २३ ॥

तद्भङ्गध्वनिरुद्धकर्णविवरो मञ्चादधस्तात्पतन्
 मूर्च्छामाच्छेदतुच्छभीतिविवशस्वान्तः स भोजेश्वरः ।
सम्भ्राम्यद्गिरिकुञ्जकुञ्जरघटाफीत्कारवाचालित-
 क्षोणीचक्रमजृम्भतोत्कटदलत्कोदण्डकोलाहलः ॥ २४ ॥

कोअंडरक्खिपुरिसा परुसं भणंता
 कोवेण जे खु परिहोदुमहिद्दवंति ।

सव्वे वि दे धणुहखंडजुएण रामो
दामोअरा अ परिताडिअ पाडअंति ॥ २५ ॥

[कोदण्डरक्षिपुरुषाः परुषं भणन्तः
कोपेन ये खलु परिभवितुमभ्यद्रवन् ।
सर्वानपि तान् धनुःखण्डयुगेन रामो
दामोदरश्च परिताड्य अपातयताम् ॥]

आसन्ध्यं तत्र तत्र त्रिदशवरपुरीगर्वसर्वङ्कषाया
दृष्ट्वा दृष्ट्वा चरन्तौ धृतरति मधुराराजधान्या विभूतिम् ।
चुम्बत्यस्ताचलाग्रं घुसृणवदरुणे लम्बमानेऽर्कबिम्बे
सम्बद्धौ सर्वगोपैः शिबिरमविशतां रामदामोदरौ तौ ॥ २६ ॥

सायं कृत्यानि कृत्वा सुखमशनविधेः शार्वरस्यावसाने
सोऽयं मायाकुमारः शशिकरविशदे तल्पदेशे शयानः ।
सख्या श्रीदामनाम्ना सह रहसि मुदा साधु राधादिकानां
शंसन् गोपाङ्गनानां रतिविषयकथा रात्रिमाशु व्यनैषीत् ॥२७॥

कंसस्तु चण्डकोदण्डखण्डनानुमितपुण्डरीकाक्षभुजदण्ड-चण्डिमा खण्डितमिवात्मपौरुषमाशङ्कमानः किङ्करसङ्घनिग्रहश्रवणेन चातिभीतिशोकव्याकुलमतिरपि स्वचित्तभावभेदमपह्नुवानो मन्त्रिपौरेभ्यस्तस्यामेव निशि श्वो मल्लभटारभटी सम्भवितेति सङ्ग्रामरङ्गञ्च प्रेक्षकाणां मञ्चसञ्चयं च चञ्चलाञ्चलपताकध्वजदण्डमण्डलमण्डित-मण्डपशतं च मणिकनकपुष्पदामसहस्रपरिष्कृतांश्च निखातसफल-रम्भाकेरक्रमुकनिरन्तरावकाशान प्रदेशान् शिल्पिभिरनल्पान् परि-कल्पयामास ॥

अस्वन्तस्वप्नसन्दर्शनचकितमतिः स्वात्मनोऽस्वन्तशङ्की
सङ्घीकृत्य स्वसैन्यं पुरमथ परितः स्थापयामास कंसः ।
सत्रा मल्लप्रवीरैः सविधभुवि समावेशितैर्मञ्चशायी
सत्रासो रात्रिशेषं कथमपि गमयामास चोन्निद्र एव ॥ २८ ॥

काल्ये बाल्ये विदूरीकृतविमततमस्काण्डचण्डप्रतापे
कल्याणाय प्रजानामुदितवति स्वावात्मतुल्यप्रभाव ।
मल्लैराध्मापितस्य प्रसभमथ महादुन्दुभेर्द्वन्द्वयुद्ध-
प्रारम्भद्योतकस्य ध्वनिभिरनिभृतैर्माधवो बोधितोऽभूत् ॥२९॥

प्रातः स्नातानुलिप्तौ सदशनसुहितौ साधु सन्नद्धवेषौ
सार्धं कैश्चित्सुहृद्भिस्सकुतुकमनसौ मल्लसङ्ग्रामकेलौ ।
अम्बष्ठप्रेर्यमाणप्रबलकुवलयापीडदन्तीन्द्ररुद्ध-
द्वारं तद्वापुरोपान्तिकमुपययतुस्सीरिनारायणौ तौ ॥ ३० ॥

दुष्टाधोरण तोरणस्य महता किं वारणं वारणे-
नानेनेदमकारणं वितनुषे किं वा रणं वाञ्छसि ।
मार्गाद् द्रागपवाहयैनमचलस्थूलं वपुस्तूलवद्-
वातेनास्य मयास्यमानमधुना न त्वं यदीचिक्षिषुः ॥ ३१ ॥

इत्थमभिदधानमम्बुजाक्षमम्बष्ठोऽतिनिष्ठुरमाचष्ट रुष्टो धृष्टः 'तिष्ठ तावदनिष्टकष्टवचनस्पष्टप्रकाशितप्रकृष्टदुरहङ्कार हे डिम्भक! कुम्भिराजस्यास्य पुरतस्तव डम्भप्रकत्थनेन किं फलम् । अन्येन केनचित् पक्षद्वारेणान्तः प्रविश्य किशोर प्रविविक्षसि चेद् अन्यथा निवर्तस्व । मा प्रलप दुर्वहगर्वसर्वङ्कषाण्यक्षराणि' इत्याक्षिप्तो भगवानगप्रमाणतुङ्गाङ्गं मातङ्गप्रवरमभिबुभूषुरभिसरति स्म ॥

चण्डाघातं चपेटैस्सपदि विदधतं मस्तके हस्तिराज-
  श्शुण्डादण्डेन गृह्णन्निबिडवलयितेनोदधीधीर्मुकुन्दम् ।
गर्जत्पर्जन्यजन्यध्वनिमभिभवता बृंहितेनोज्जजृम्भे
  यावत्तावत् परिभ्रश्य स चरणयुगे लीनवानस्य शौरिः ॥ ३२ ॥

बालाग्रे परिगृह्य दन्तिनममुं गोपालबालश्चिरं
  लीलावान् भ्रमयाश्चकार स महत्कौलालचक्रं यथा ।
भूयो भूमितले निपात्य चरणेनापीड्य कुम्भस्थले
  दन्तावुत्खनति स्म तस्य तरसा सन्तापहारी सताम् ॥ ३३ ॥

पुष्करविवरद्वन्द्वेनास्य श्वभ्रेण चभराजस्य ।
उद्धृतरदसुषिराभ्यां चाशु बहिः पञ्च निर्गताः प्राणाः ॥३४॥

एकं कुञ्जरदन्तमग्रजनुषे दत्त्वा परेण स्वयं
  कोपादापततो जघान भगवानम्बष्ठमुख्यान् भटान् ।
द्वारेणोज्झितकण्टकेन शनकैरन्तर्विशन्तौ दृशो-
  र्धारेणाद्भुतविभ्रमेण सुजनानन्वग्रहीष्टामुभौ ॥ ३५ ॥

रङ्गे तौ रङ्गतः स्म स्मरधियमबलासन्ततिभ्यो दिशन्तौ
  सङ्गेनापतचेतस्सु च सकलपरब्रह्मबोधाय साधू ।
कंसादीनां तु हिंसासकुतुकमनसामन्तकभ्रान्तिहेतू
  संसारध्वान्तविध्वंसनमिहिरमतिं धीमतामादधानौ ॥ ३६ ॥

मञ्चं काञ्चनरत्नसञ्चयमयं चञ्चत्पताकध्वजं
  कञ्चित्काञ्चनशैलभागमिव स प्रारुह्य भोजेश्वरः ।
सच्छत्रामलचामरादिविलसत्पर्यन्तमन्तस्स्मय-
  प्रोच्चण्डप्रकृतिः स्थितिं विदधिवान् मध्येमहीभृत्सभम् ।।३६।।

कण्णाडाणत्तकंबोअअमअहमहारट्ठरट्ठाहिणाहा
अण्णाणं मडळाणं पिहुपहुणिवहा मल्लजोहाणता णम् ।
ज्जुझं णिज्झादुकामा मणिकणअसमंचंतमंचंतरूढा
सच्छंदं ते णिउज्झंगणअळमहिदो सण्णिसण्णा पसण्णा ॥३८॥

[कर्णाटानर्तकम्बोजकमगधमहाराष्ट्रराष्ट्राधिनाथा
अन्येषां मण्डलानां पृथुप्रभुनिवहा मल्लयोद्धानता एनम् ।
युद्धं निध्यातुकामा मणिकनकसमश्चन्मश्चान्तरूढाः
स्वच्छन्दं ते नियुद्धाङ्गणतलमभितः सन्निषण्णाः प्रसन्नाः ॥]

चाणूरो मुष्टिकश्च प्रसभमभिगतौ भोजराजानुशिष्टौ
मुष्टामुष्टि प्रयोक्तुं प्रथनमतिपटून् मल्लसेनाधिनाथौ ।
आह्वासातामनन्दं मदघनमनसौ माधवं कामपालं
चोभौ तौ सिंहपोताविव विफलमदस्तम्भितौ कुम्भिराजौ ॥३९॥

नारिष्टोऽहं न केशी न बहुतृणतृणावर्तदैत्यो न चाघः
श्लाघन्ते ये रिपुभ्यो नहि निजवपुषा किन्तु वेषान्तरेण ।
बाहूबाहव्यमार्यं रणमपि च तलातल्यपि स्पष्टरूपं
मुष्टीमुष्टीति चैवंविधमनुपधिकं खल्विदं मल्लयुद्धम् ॥४०॥

आवाभ्यामभ्यमित्राविह सदसि सतां साधु सङ्ग्रामयेथा-
मेकैकं वा समं वा समरमुभयथाप्यावयोरुत्सवोऽयम् ।
निर्गोपाला भवित्री दृढमियमथवा वीतमल्ला भवित्री
धात्री पात्रीभवामो वयमिह यशसां सर्वथा निर्विवादम् ॥४२॥

इत्थं ब्रुवाणे चाणूर मुष्टिकेनाभिनन्दिते ।
नन्दसूनुरुवाचेदं मन्दस्मेरमुखाम्बुजः ॥ ४२ ॥

योग्यामाजन्मनो ये परमिह परिचिन्वन्ति सङ्ग्रामरङ्गे
योग्यास्ते मल्लवीराः क्व पुनरविदितायोधना वल्लवाः क्व ।
तक्रं विक्रीणते ये बत दधिपयसी चेति वृत्तेर्निमित्ता-
दर्धं किं ते विदन्ति द्विरदतुरगयो रत्नयोर्यत्नतोऽपि ॥ ४३ ॥

तथाप्यभ्यर्थिता यद्यत्तद्ददति साधवः ।
युधा त्वामर्थिनोरिच्छा तयैवापूरयिष्यते ॥ ४४ ॥

द्वन्द्वयुद्धं प्रववृते कृष्णचाणूरयोस्ततः ।
राममुष्टिकयोश्चापि मुष्टीमुष्टि तलातलि ॥ ४५ ॥

कष्टं भो मृगपोतकौ मृगरिपुद्वन्द्वेन सर्पार्भका-
वुद्दाम्ना नकुलद्वयेन पशुकौ व्याघ्रोरसाभ्यां समम् ।
को नाम प्रथनाय चोदयति धिङ् नानिष्टमेतद्रणं
द्रष्टुं युक्तमिति द्रुतं न्यवर्तत सतां सङ्घस्ततो दूरतः ॥ ४६ ॥

हस्तग्राहं नियुद्धं विदधतुरुभकौ कृष्णचाणूरमल्लौ
घ्नन्तौ तौ पादघातं मुहुरपि च मिथो मुष्टिभिर्घट्टयन्तौ ।
भ्राम्यन्तौ मण्डलेन प्रकटतरमुरःपेषमुत्पिष्टगात्रा-
वुच्चैर्द्रागुत्प्लवन्तौ घटितविघटितौ मेषवद्रोषभाजौ ॥ ४७ ॥

यथा माधवचाणूरौ तथैव बलमुष्टिकौ ।
औरभ्रं माहिषं युद्धं कौक्कुटं च वितेनतुः ॥ ४८ ॥

किं बहुना,

चण्डैर्मुष्टिविघातैर्मुष्टिकचाणूरयोर्मुसलिकृष्णौ ।
पिण्डीकृत्य शरीरे दण्डभृते प्राभृते ददतुः ॥ ४९ ॥

ततश्चापरानपि परापततः पराक्रमिणोऽपि मल्लसैनिकान् परा-
भूय परिमर्दयामासतुर्जनार्दनप्रलम्बमर्दनौ दुर्दमाविव शार्दूलौ गर्दभा-

दिक्षुद्रजन्तून् । इत्थमात्मनोऽनर्थसार्थमापतितमसहमानो मानाध्मातमीतरौग्रसेनिरुग्रशासनः सर्वानपि सगर्वानात्मसैनिकान् समाहूय समाज्ञापयामास ॥

भो भो वीरभटा ! हठेन वसुदेवादीनिहास्मद्द्रुहो
गोपालानपि नन्दगोपसहितानन्यांश्च जन्योन्मुखान् ।
कृष्णं चाथ तदग्रजं च जनकं द्रागुग्रसेनं च मे
सद्यो हिंस्त समस्ततस्तादिह नः साम्राज्यलाभो भवेत् ॥५०॥

वार्यतां तूर्यघोषोऽयं वीर्यवन्तो महाभटाः ! ।
शौर्यभाजोऽपि शौर्यादीन् बध्नीत निहताथवा ॥५१॥

एव्वं गव्वेण सव्वंकसविसमरुसा वाउळं माउळं तं
कंसं दट्ठूण मंचट्ठिअमुवरि जवा उप्पडंतो हसंतो ।
खग्गव्वावारदुग्गं वि खु महुमहुणो झत्ति गह्णाइ कंठे
मंचादो किंच पाडेइअ भुवि पडिओ तस्स वच्छंमि पच्छा ॥५२॥

[एवं गर्वेण सर्वङ्कषविषमरुषा व्याकुलं मातुलं तं
कंसं दृष्ट्वा मञ्चस्थितमुपरि जवादुत्पतन् हसन् ।
खड्गव्यापारदुर्गमपि खलु मधुमथनो झटिति अगृह्णात्कण्ठे
मञ्चात्किंच पातयित्वा भुवि पतितस्तस्य वक्षसि पश्चात् ॥]

तावत्तन्मुष्टिबन्धाद् द्रुतमपहृतया तद्गळं खड्गयष्ट्या
कर्तं कर्तं समक्रीडत परुषरुषाक्रान्तधीश्चक्रपाणिः ।
कर्षं कर्षं च कण्ठस्रुतरुधिरपरिप्लावितं तस्य गात्रं
धात्रीपृष्ठे स निष्ठां गतमपि कृतवान्निष्कृतिं दुष्कृतीनाम् ॥५३॥

हिरण्यकशिपोरुरः कुलिशकोटितीक्ष्णैर्नखै-
र्निखातमुरुबुद्बुदक्षतजधोरणीपूरितम् ।

कृतं नृहरिणा पुरा मुरजिता यदेतत्सुरै-
रसस्मरदुरस्तटीस्फुटितकेन भोजेशितुः ॥ ५४ ॥

दिग्दन्तावळगण्डभित्तिगळितानुन्मुच्य दानद्रवा-
नागच्छाद्भिरळिव्रजैरविरळैराच्छादयन्ती दिशः ।
पौष्पी वृष्टिरथ त्रिविष्टपजुषां तुष्टैर्विसृष्टा गणैः
कंसध्वंसकृतः पपात शिरसि व्यालोलकेशे हरेः ॥ ५५ ॥

हृद्यं विद्याधरीणां गळललितरवैरन्वितं किन्नरीणां
मुग्धं सिद्धाङ्गनानामखिलजनमुदः कारणं चारणीनाम् ।
रम्भादीनां च सम्भावितममरगणैः सर्वतः स्वर्वधूनां
नृत्तं तत्र प्रवृत्तं दिवि भुवि च मुदा मर्त्यसीमन्तिनीनाम् ॥

वैरेणापि स्मरणमनिशं वासुदेवस्य कुर्वन्
निर्वाणं द्रागभजत हरेरैकरूप्यं स कंसः ।
भक्त्या योऽसौ भजति सुजनः श्रीपतिं तस्य किं नु
ब्रूमः क्षेमं चरितमजितस्यान्यदेवेति वाच्यम् ॥ ५७ ॥

अष्टौ कंसस्यानुजा रुष्टचित्ता
मुष्टौ पाणेश्चापखड्गादिमन्तः ।
औद्धत्येन प्राप्य संयुध्यमाना
और्ध्वीं नीता रौहिणेयेन सिद्धिम् ॥ ५८ ॥

अक्रूरेण समं समेत्य पितरौ कारागृहे संयतौ
नत्वा बन्धनतो विमोच्य पतितौ साष्टाङ्गपातं क्षितौ ।
हर्षाश्रुप्रतिरुद्धकण्ठविवरौ तातश्च माता च तौ
पाणिभ्यां परिगृह्य चात्मतनयावन्वग्रहीष्टामुभौ ॥ ५९ ॥

पालेआअलमोलिघोलिरमहाकल्लोलहल्लोहल-
प्फारुड्डामरचारुचारणधुणीसच्छाहि वच्छा इरम् ।
तुम्हे जीवह पुण्णिमामअमऊहुण्णिद्दजोह्लाझरी-
पंडिच्चच्छिउरच्छईहि महिआ कित्तीहि धत्तीअले ॥ ६० ॥

[प्रलेयाचलमौलिघूर्णन्महाकल्लोलहल्लोहल-
स्फारोड्डामरचारुचारणधुनीस्वच्छाभिर्वत्सौ चिरम् ।
युवां जीवतं पूर्णिमामृतमयूखोन्निद्रज्योत्स्नाझरी-
पाण्डित्यच्छिदुरच्छवीभिर्महितौ कीर्तीभिर्धात्रीतले ॥]

इत्थमतिप्रहर्षयोरुपहितप्रमोदाश्रुवर्षयोर्मुहुर्मुहुरपि मुसलिमाधवा-वाश्लिष्याश्लिष्य मूर्धनि चाघ्रायाघ्रायानन्दामृतसागरनिमग्नयोरात्मा-नमप्यविदतोर्देवकीवसुदेवयोराशिषमवाप्यातिप्रवृद्धतेजःप्रकर्षौ सम-प्रशक्तित्रयपरिग्रहावुग्रसेनमपि बन्धनादपनीय यादवकुकुरभोजान्धका-नामेकाधिपत्यमस्मै परिकल्पयामासतुरनल्पप्रभावसुभगावखिलजगत्-पालनपरायणौ सीरिनारायणौ ॥

इति स महतीभक्तिः पित्रोश्चिर वरिवस्यया
गमितदिवसः सान्द्रानन्दः समं निजबन्धुभिः ।
अरमत रमानाथस्तस्मिन् मुदा मधुरापुरे
सुरमुनिनरक्षेमाधानक्षमेण निजौजसा ॥ ६१ ॥

इति श्रीभागवतचम्पूप्रबन्धे
कंसवधो नाम
षष्ठः स्तबकः ॥

अथ सप्तमः स्तबकः ।

कदाचन तदा मुदा सविधमेत्य पित्रोरुभौ
गदाग्रजतदग्रजावनमतां तदङ्घ्रिस्पृशौ ।
स्नुतस्तनपयःस्रवैरसिचदास्रवर्षैश्च तौ
सहर्षमथ देवकी सरसमेवमूचे च सा ॥ १ ॥

वत्सौ वामुपलालनानि वचसा दुग्धान्नदध्यादिभिः
सौहित्यं परिमार्जनैश्च वपुषोः संस्कारमालेपनैः ।
एवम्प्रायमपत्यपोषणमहासाम्राज्यसौख्यं मह-
न्मातॄणामिदमेकमप्यधिगतं नास्माभिरायुष्मतोः ॥ २ ॥

नत्वा कृष्ण उवाच मातरनिशं यत्पादशुश्रूषणं
यच्चेतोऽभिमतानुवर्तनमशेषाज्ञाविधानं च यत् ।
कुप्याकुप्यवसुप्रदानमपि यन्मात्रे सुपुत्रैः कृतं
नैकस्या अपि तत्प्रसूतिजरुजस्तस्या भवेन्निष्कृतिः ॥ ३ ॥

प्रसूतमात्रः स्वयमुज्झितप्रसूः प्रपोषयन्नन्यजनैर्निजं वपुः ।
अहो अहं कोकिलधर्ममास्थितो भवामि तानप्यधुना परित्यजन् ॥

जनकजननीशुश्रूषाख्यं स्वजन्मफलं मह-
ज्जनुषि सुखदं नॄणामत्राप्यमुत्र च साधु यत् ।
अनधिगतवानेतच्चेतावतोऽहमनेहसः
पदतलरजोभिर्वामागः प्रमार्ज्मि तदात्मनः ॥ ५ ॥

इति प्रणम्य पितरावतिप्रमोदामृतसिन्धावमू निमज्जयन् निवृत्तः

सुवृत्तजनितजगदानन्दः स नन्दगोपमुपगम्य वन्दमानः साग्रजः साक्रूरश्च समग्रभक्तिविनयविनतबन्धुरकन्धरो बन्धुजनसमक्षमिदमाचचक्षे ॥

हे तात! व्रजतु व्रजं प्रति भवान् बन्धुव्रजैरन्वित-
स्तत्रस्थाश्च निरस्तमद्विरहजातङ्काः करोतु प्रजाः ।
कंसग्रीष्मविशोष्यमाणजनतासस्यं यदस्मत्पुरं
तन्निर्वाप्य धनादिवृष्टिभिरितस्तत्रागमिष्याम्यहम् ॥ ६ ॥

इति ब्रुवाणो बहु रत्नसञ्चय
सुवर्णपात्राणि बहूनि चार्पयन् ।
सुसूक्ष्मवासांसि च गोपमण्डलं
सनन्दगोपं स हरिर्न्यवीवृतत् ॥ ७ ॥

नीतिशास्त्रविषये बृहस्पतेः
शिष्यमुद्धवमनुद्धताशयम् ।
भक्तिमन्तमधिकं तमात्मनः
स्निग्धबन्धुमकरोज्जनार्दनः ॥ ८ ॥

दाशार्हवृष्णिकुकुरान्धकसात्त्वता ये
कंसान्न्यलेपत भिया गिरिकाननेषु ।
आहूय वेश्मसु निजेषु निवेश्य सर्वा-
नाढ्यभविष्णवयदम्बुजलोचनस्तान् ॥ ९ ॥

धीमानानकदुन्दुभिस्तनययोस्तालाङ्कगोविन्दयो-
र्व्राह्मं कारयति स्म गर्गमुनिना संस्कारमा जन्मनः ।
यत्रोत्तेजितयोरिवाधिकतरा मुक्ताफलेन्द्राश्मनोः
पूर्वस्मादपि येन तावदनयोरासन् प्रदीप्तिश्रियः ॥ १० ॥

विद्या चक्षुरचार्मणं तनुभृतां सूक्ष्मार्थसाक्षात्कृतौ
साक्षि स्यादनया विनापि हि सचक्षुः सन्नचक्षुः पुमान् ।
जात्यन्धादपि सोऽन्ध एव न परेणाग्रेसरेणाप्यसौ
गम्येऽप्यध्वनि गम्यते कथमपि श्राव्यं न च श्राव्यते ॥११॥

तस्मादस्माकमस्याः समधिगमविधावद्य सद्यः प्रयत्नः
कार्यः स्यादार्य कार्यान्तरमपि जहतामार्यधुर्याध्वसिद्ध्यै ।
इत्थं प्रोक्तेन बाढं तदिति निगदता चाग्रजेनाग्रयाता
सार्कं सम्प्राप्य सान्दीपनिमकृत मुनिं शौरिराचार्यवर्यम् ॥१२॥

अवन्तिदेशे वसतस्ततोऽस्मा-
दशेषवेद्यार्थविदो महर्षेः ।
कलाश्चतुष्षष्टि(?) गृहीतवन्तौ
दिनैश्चतुष्षष्टिमितैरुभौ तौ ॥ १३ ॥

तर्कव्याकरणार्थशासनधनुश्शास्त्राणि चान्वीक्षिकी-
मीमांसात्रयसांख्यसाङ्कचतुर्वेदीतिहासागमान् ।
अन्यच्चापि यदस्ति वस्तु विदुषा वेद्यं तदध्यापिपत्
सर्वं सप्रतिभप्रसन्नसुधियावतौ स सान्दीपनिः ॥ १४ ॥

सुचेष्टितानां निधिराभिजात्यवान्
कुचेलनामाथ कुमारभूसुरः ।
अवाप्य सान्दीपनिशिष्यतां तदा
सतीर्थ्यतामास्थित रामकृष्णयोः ॥ १५ ॥

ततश्च समधीतसमस्तविद्यौ अनवद्यगुणगणहृद्यावाद्यपुरुषौ अभिवाद्य गुरुपादान् गुरुदक्षिणार्थम् आचार्याभिमतजिज्ञासावन्तौ

इतीङ्गितेनानुमाय महामुनिरिमौ कुमारौ सादरमात्मगृहिणीमनोरथमप्यवगम्य सम्यगनयोश्चातिमानुषं प्रभावमप्यवबुद्ध्य किञ्चिदभिप्रेतमर्थमभ्यर्थयामास

मज्जन्महोदधिजले महति प्रभासे
मज्जन्मनः फलकृदप्रियतात्मजो मे ।
पञ्चत्वमाप्तमिह पञ्चषहायनं तं
सप्राणमैक्षिषि सुतं भवतोः प्रभावात् ॥ १६ ॥

संदीवणिस्स मुणिणो मुणिऊण वंछं
संपत्थिआ ळहु रहेण पहासतित्थम् ।
पत्तं च तत्थ वरुणं गुरुणो तणूअं
पत्थति णं च बळभद्दअवासुभद्दा ॥ १७ ॥

[सान्दीपनेर्मुनेर्ज्ञात्वा वा वाञ्छां
संप्रस्थितौ लघु रथेन प्रभासतीर्थम् ।
प्राप्तं च तत्र वरुणं गुरोस्तनूजं
प्रार्थयेतामेनं च बलभद्रकवासुभद्रौ ॥]

अप्सु व्यापन्नमत्र प्रदिश गुरुसुतं क्षिप्रमेवाप्पते! त्वं
नास्माभिर्वासुदेवौ! स खलु मुनिसुतस्सत्यमभ्याहृतोऽभूत् ।
तत्केनाभ्याहृतोऽसौ वद वरुण! वसत्यत्र शङ्खस्वरूपो
दुष्टो दैत्योऽम्बुगर्भे नियतमयमनेनाहृतो भक्षितः स्यात् ॥ १८ ॥

श्रुत्वेदमम्बुधिजलं तरसावगाढौ
तं चापि पञ्चजनसञ्ज्ञमदर्शतां तौ ।
किं चाशु तं निहतवान् हरिरस्य कुक्षौ
नापश्यदर्भकममुं जठराग्निजीर्णम् ॥ १९ ॥

तज्जन्यं पाञ्चजन्यं घनरवमहरत् कम्बुमम्बूदराद् द्रा-
गुन्मज्जन् धर्मराजालयमलमकरोदच्युतः साग्रजन्मा ।
संहृष्टेनाभिजुष्टः सपदि गुरुसुतं लम्भितः प्राणवन्तं
सन्तुष्टः प्राप्य सान्दीपनिमकृत कृती दक्षिणां चामुनास्मै ॥

अन्धो जन्मत एव यः स सहसा लब्ध्वा यथा दर्शनं
निस्स्वो यः स वसुप्रपूर्णमाधियन् निक्षेपकुम्भं यथा ।
हृष्येतामधिकं ततः शतगुणं हर्षं समासेदतु-
र्दिष्टान्तप्रतिपन्ननन्दनपुनस्सन्दर्शनाद् दम्पती ॥ २१ ॥

जीव्यास्तं चिरमिन्दुबिम्बवदनौ हे रामदामोदरा-
वव्यास्तं जगदस्तकण्टकमदः स्वस्त्यस्तु वामर्भकौ ! ।
प्रत्यानीय ददाति मृत्युसदनान्मर्त्याय पुत्रं जग-
त्यन्यः को गुरुदक्षिणार्थमयि भो वीरौ ! युवाभ्यामृते ॥ २२ ॥

शरदिजशशिज्योत्स्नाशुभ्रैर्यशोभिरशेषतो
जगति सितिमाद्वैतं नीते त्वया मधुसूदन ।
ध्रुवमरुणिमा पादाब्जे ते निलेष्यति नीलिमा
पुनरयमुपश्लेष्टा ज्येष्ठस्य ते वसने परम् ॥ २३ ॥

विद्या हृद्या विमतविजये चातुरी माधुरी वा
गाने दीने तरुणकरुणा रक्षणे दाक्षिणत्वम् ।
ओजस्तेजो भुजबलमलं भूयसी श्रेयसी च
श्रीमन् राम ! श्रितहितकृतोः कृष्ण ! वामस्तु सर्वम् ॥ २४ ॥

इत्थमादिभिरत्यन्तसन्तोषस्नेहबहुमानविस्रम्भविजृम्भमाणविविध-
रसविशेषविवशान्तरात्मनो महामुनेराशीर्वादैरधिकतरसमोधितसहजा-

नुभावाववनतकन्धरौ बन्धुरसुचरितधुरन्धरौ रामदामोदरौ मुहुर्मुहु-
रभिवाद्याचार्यमाचार्यानीं चानुज्ञाप्य प्रसाधितसमस्तमनोरथौ महारथौ
रथमारुह्य गुरुगृहान् प्रदक्षिणीकृत्य निवृत्य सत्वरं निजास्पदं मधुरा-
पुरमेवाभिजग्मतुः ॥

प्राह स्मोद्धवमेकदानुरहसं हस्ते गृहीत्वा हरि-
स्सौहार्दात् किमपि ब्रवीमि सुहृदा सम्पाद्यमर्थान्तरम् ।
यत्रस्थं स सखे! स्वपोषमपुषन्मां नन्दगोपः पिता
माता तद्गृहिणी च तद् व्रज तयोरभ्यर्हणार्थं व्रजम् ॥ २५ ॥

किं च,

मद्विश्लेषव्यथितमनसो मत्कृते मन्मथार्ता
मत्प्रेयस्यो मम खलु कथावर्णनैकावलम्बाः ।
मद्रूपानुस्मरणशरणास्तत्र गोपाङ्गनास्ता
मत्सन्देशैः सुमुख! भवता सम्यगाश्वासनीयाः ॥ २६ ॥

मा शोचिध्वं मदिरनयना मन्मनोमन्दिरा वः
स्वप्नेऽप्येते कथमिव वयं हन्त भोः! सन्त्यजामः ।
कार्यायत्ताः कमपि समयं मत्पुरीमावसाम-
स्तावन्मात्रं विरसमपि मे विप्रयोगं सहध्वम् ॥ २८ ॥

युष्मानस्मत्परिचयवशादस्तसंसारदुःखा-
नानन्दात्मन्यमृतजलधौ मज्जनान्मज्जयामः ।
अस्मद्ध्यानप्रवणमनसां वस्तुतो वस्तु कः स्या-
द्विश्लेषो नः क्व नु पुनरितो दूरता सन्निधिर्वा ॥ २८ ॥

एव्वं णो वअणाइता सुवअणा पावेज्ज सज्जो भवं
गच्छज्ज त्ति विसज्जिओ णिअरहारूढो खु तेणुद्धवो ।

सिग्घं तो गदुऊण गोट्ठमहिअं तुट्ठो पविट्ठो सअं
संझाअं समुपट्ठिओ असमए णंदं जसोअं च सो ॥ २९ ॥

[एवं नो वचनानि तावत् सुवदनाः प्रापयतु सद्यो भवान्
गच्छत्विति विसर्जितो निजरथारूढः खलु तेनोद्धवः ।
शीघ्रं ततो गत्वा गोष्ठमधिकं तुष्टः प्रविष्टः स्वयं
सन्ध्यायां समुपस्थितोऽसमये नन्दं यशोदां च सः ॥]

सत्कुर्वाणावथैनं विधिवदवदतामश्रुपूर्णेक्षणौ तौ
श्रीमन्! रामस्य कृष्णस्य च किमु सुतयोर्भद्रमायुष्मतोर्नः ।
वत्सावस्मानधीतः किमु किमु वदतोऽस्मत्कथा वा प्रसङ्गे
दुग्धान्नं किं त्रिरह्नः प्रदिशति ससितं तृष्णजोः कृष्णमाता ॥३०॥

अनक्षरं पुस्तकमस्तजीवितं
शरीरमक्ष्मापति राजमन्दिरम् ।
अनीश्वरं वा महदीश्वरालयं
यथा तथाकृष्णमिदं मदास्पदम् ॥ ३१ ॥

अस्मिन्नेव गृहाङ्कणे घणघणत्काञ्चीतुलाकोटिकौ
गोधूळिव्रजधूसराङ्गलतिकौ गोपालबालैः समम् ।
क्रीडापुत्रकपालललोष्टशकलैरक्रीडतां यावुभौ
मत्पुत्रौ बलकेशवौ मनसि तावद्यापि मे नृत्यतः । ३१ ॥

विशदयशोदानन्दौ राममुकुन्दाविदं यशोदानन्दौ ।
स्मृत्वाथावदतां तौ कृतां च वाचामुना यथावदतान्तौ ॥ ३३ ॥

हरिसंदेसवओहिं हरिमं दे वाविआ जमोआणंदा ।
सुहिअं पाणासणदो सुहिअं च कुणंति णं सुहसआणं अ ॥ ३४ ॥

[हरिसन्देशवचोभिर्हर्षं प्रापितौ तौ यशोदानन्दौ ।
सुहृदं पानाशनतस्सुखितं चाकुरुतां सुखशयानं च ॥]

प्रातर्दृष्ट्वा ध्वजाग्रप्रणिहितविनतानन्दनं स्यन्दनं तद्
दूतः कोऽप्यागतः स्यादिह खलु मधुरामन्दिरान्नन्दसूनोः ।
अक्रूरो वा परो वा भवतु तमधुना साधु सम्भावयामो-
यामोऽस्योपान्तमित्थं हरिसखमभितः प्रापुराभीरनार्यः ॥३५॥

मेघश्यामतनोर्मनोहरगुणग्रामस्य कामद्युते-
मौंघत्वं दिशतः स्वरूपसुषमासम्पत्तिसान्द्रामृतैः ।
श्रीकृष्णस्य सनाभिवन्ननु भवान् प्रायेण तुल्यच्छविः
श्रीमन्! प्रीणयतीक्षणानि तदनालोकाद्विदूनानि नः ॥३६॥

दूतस्त्वं किमु दूरमुज्झितवतः श्रीपाददासीरिमा
गोपस्त्रीर्मधुरापुरैकवसतेर्नाथस्य नः श्रीपतेः ।
रूपव्याहृतिमाधुरीभिरधरीकुर्वन्ति सर्वाः स्त्रियो
यास्ताभिः सह माधुरीभिरधुना स्त्रीभिः स रंरम्यते ॥३७॥

रासक्रीडाभिरीडावहमहितमहानन्दसन्दोहमूर्ति-
र्मासद्वन्द्वं स वृन्दावनभुवि वनितावृन्दमभ्याननन्दत् ।
हा सम्प्रत्येतदेव स्वविरहदहने भस्मसात्कर्तुमेष
प्रारब्धो दूर आस्ते हित इतरवधूसंसदे कंसवैरी ॥३८॥

चञ्चत्पिञ्छावतंसं चटुलकुवलयस्पर्धिमुग्धाक्षिलीलं
किञ्चिद्व्यालोलभालातपरुचिवसनोदञ्चिकाञ्चीकलापम् ।
गुञ्जन्मञ्जीरपादाम्बुजमसितघनश्यामळश्रीमदङ्गं
मञ्जुस्मेरास्यमीक्षेमहि कथय कदा तं जनं कञ्जनाभम् ॥३९॥

क्वणद्वंशीनालीसततपरिभुक्ताधरमधो-
र्मधोर्जेतुर्मन्दस्मितमयसुधास्यन्दि वदनम् ।
मुहुश्चुम्बंचुम्बं मृदितवनमालोज्ज्वलमुरः
कदा वाश्लेक्ष्यामो वयमयि सखे! किं न वदसि ॥ ४० ॥

प्राणाः पञ्च स एव पञ्चविशिखोऽस्माकं स कंसं द्विष-
न्नेको विद्धि स एव जीवितफलं सर्वं स एवेश्वरः ।
तेनैवं बत निर्दयेन सहसा कृष्णेन तृष्णावता
त्वास्वेव स्त्रितरासु हा विरहिता एताः कथं प्राणिमः ॥ ४१ ॥

मनोरथैर्नः सह वातरंहसा
रथेन यातः स इतो महारथः ।
कटाक्षपाशैरिव पौरयोषितां
बलाद् विकृष्टो न निवृत्य पश्यति ॥ ४२ ॥

अहो भाग्यं भोग्यं किमपि दुरवापं सुरवधू-
जनैरप्यक्लेशं स्वशयशयमासादितवताम् ।
पुरस्त्रीसङ्घानामतिमहदभाग्यञ्च बलवद्
व्रजस्त्रीसङ्घानां करगतमपि भ्रंशितवताम् ॥ ४३ ॥

राधे! जातेऽपराधे पशुपमृगदृशां गर्वजे निर्विशेषे-
ऽप्याधेराधानहेतोः स्वयमपरवधूसंहते रंहते स्म ।
प्रच्छन्नं यस्त्वदिच्छां क्वचन विजने पूरयिष्यन्निवार्यं
भूयस्त्वामप्यहासीदहह स कितवः कस्य विस्रम्भयोग्यः ॥

सोक्खं दुक्खं च सिक्खावइ सअलअणं अव्ववत्थं खु दव्वं
सव्वण्णो हंत कह्लो कहमहव उवालंभणिज्जो स होज्ज ।

सव्वं णो मंदभग्गत्तणघणपरिणामेक्कसिट्ठं खु कट्ठं
दिट्ठादिट्ठं ण मिट्ठं सहइ फळमणिट्ठं च संतोसवंतो ॥ ४५ ॥

[सौख्यं दुःखं च शिक्षयति सकलजनानव्यवस्थं खलु दैवं
सर्वज्ञो हन्त कृष्णः कथमथवोपालम्भनीयः स भवति ।
सर्वं नो मन्दभाग्यत्वघनपरिणामैकशिष्टं खलु कष्टं
दृष्टादृष्टं न मधुरं सहते फलमनिष्टं च सन्तोषवान् ॥]

इति तासां व्रजस्त्रीणां मुनीनामपि योगिनाम् ।
अल(म्भाऽभ्या)मीश्वरे भक्तिं दृष्ट्वाचित्रीयतोद्धवः ॥ ४६ ॥

इष्टापूर्तैरुपनिषदुपज्ञैश्च विज्ञानतन्त्रै-
रष्टाङ्गैश्च श्रुतिपरिचयोपक्रमैर्योगमार्गैः ।
यत्नैरेभिः कथमपि बुधा यत्र पात्रीभवन्ति
ब्रह्माद्वैतं तदिह पशुपस्त्रीभिराभिः सुल(म्भऽभ्य)म् ॥ ४७ ॥

इत्थं विस्मयहर्षविह्वलमना विष्णुप्रियम्भावुका
गोपीरेव नमो नमोऽस्त्विति हृदा सम्भावयन्नुद्धवः ।
खिन्दाना विरहेण नन्दतनयस्यानन्दसन्दायिभिः
सन्देशैः सुखयाञ्चकार सुदृशः सूक्तामृतैः स्वैरपि ॥ ४८ ॥

सन्देशस्तु 'मा शोचिध्वम्मदिरनयना' इति श्लोकद्वयेन भगवतैव योऽभिहितस्तमेव ताभ्यः सुव्यक्तमर्थतः शब्दतश्चानवद्यमनुवर्णयामास, सम्पूर्णानन्दाश्च ताः सन्देहरहितेन तेन सन्देशेन कारयामास च मतिमानुद्धवः । स्वयञ्चेदमुदाजहार—

संयोगाद्धि वियोग एव सुजनैः श्लाघ्यो जनानां यत-
श्चिन्तासन्ततिमन्तरन्तरयितुं नो वेत्ति वस्त्वन्तरैः ।
विश्लेषेषु वियोगिनामिह तु सा विष्णौ सुनिष्णातता-
मायातीति महत्प्रियं भवति वो मुक्तिस्तु हस्तेशया ॥ ४९ ॥

इति तस्य वचः श्रुत्वा प्रशान्तविरहज्वराः ।
प्रहृष्टा गोपिकाः सर्वाः प्रणेमुर्मुहुरुद्धवम् ॥ ५० ॥

स्थित्वा तत्र स मासमात्रमनिशं कृष्णैकतानात्मभिः
स्त्रीपुंसैः सह तत्कथानुकरणव्यग्रैरुदग्रोत्सवम् ।
नव्यं गव्यघटाद्युपायनशतं नन्देन दत्तं हरेः
संगृह्यानुमतोऽमुना रथमथारूढो जगामोद्धवः ॥ ५१ ॥

मधुरापुरमागतः स वेगा-
न्मधुशत्रोः प्रणनाम पादपद्मे ।
मधुराणि च गोपसुन्दरीणा-
मथ विज्ञापयति स्म चेष्टितानि ॥ ५२ ॥

स्वैरं सैरन्ध्रिकायाः सदनमुपगतः सार्धमेवोद्धवेन
स्मारक्रीडाभिरेनामरमयदमितप्रेमकामाभिरामाम् ।
का ते वामोरु! वाञ्छा पुनरिति सुदतीं पृष्टवांस्तुष्टचेता
गोविन्दः सा च वव्रे वरमविरहिताहं त्वयावर्तिषीति ॥ ५३ ॥

ततश्च तया सहैव काश्चिन्निशा विशालनयनया विविधरहो-विहरणविलासविशेषै रममाणो रमापतिरात्मवीर्योपसंक्रमणेन तावदुपश्लोकनामानमात्मजमस्यां जनयामास, स्वयमयामास चात्ममन्दिरमेव ।

अथ च कदाचिदुद्धवबलभद्रसहितो भगवानक्रूरभवनमलङ्कुर्वाणस्तेन च प्रमोदामृतार्णवनिमग्नेनाभिसत्कृतश्चाभिनीतश्चाभिरामपरिबर्हबृंहितपर्यङ्कमभ्यन्तरालयमत्र शयानश्चानेन पादपद्मपरिचर्यादिभिरुपचरितश्च बहुभिः स्तोत्रैरभिष्टुतश्च तां निशां गमयामास ॥

प्रातस्तं हास्तिनाख्यं पुरमगमयत श्रीपतिर्गान्दिनेयं
ज्ञातुं कुन्तीसुतानामिह विपिनतलादागतानां प्रवृत्तिम् ।
वृत्तिं चामीष्वरीणां सुमतिषु धृतराष्ट्रात्मजानां प्रजानां
तत्रत्यानां च सर्वं सपदि विदितवानागतः सोऽपि कृष्णम् ॥

पितृष्वस्रा कुन्त्या पितृमरणखिन्नैश्च तनयै-
स्तदीयैः सन्दिष्टं सकलमपि तद् धर्मजमुखैः ।
अभाणीदक्रूरस्तदपि धृतराष्ट्रात्मजनुषां
द्विषामेषां क्रूरं चरितमपि तस्मै भगवते ॥ ५५ ॥

कौन्तेयान् पालयिष्यामि नाशयिष्यामि तद्रिपून् ।
कञ्चित्कालं प्रतीक्षस्वेत्यक्रूरमवदद्धरिः ॥ ५६ ॥

कालेऽस्मिन् कंसनाशादधिगतविधवाभावदोदूयमाने
अस्तिप्रास्ती समेते पितरमथ जरासन्धमिन्धानासरम् ।
क्रन्दन्त्यौ मुक्तकण्ठं नयनजसलिलैस्तत्पदे क्षाळयन्त्यौ
छिन्नेनानर्चतुस्तं क्षितितलपतिते कण्ठसूत्रद्वयेन ॥ ५७ ॥

हंहो सिंहोरुसत्त्वं मगधपतिममुं मामनादृत्य बालो
गोपालो मातुलं स्वं किल विनिहतवानेष जामातरं नः ।
वत्से ! शोकं जहीतं सहरिमुसलि तत् संहरिष्यामि सर्वं
सद्यो वृन्दं यदूनामिति नृपतिरसावुद्धतः प्रत्यजानात् ॥ ५८ ॥

विंशत्यक्षौहिणीभिस्त्रिसृभिरपि युतस्तीक्ष्णशस्त्रास्त्रवर्ष-
प्रावृण्मेघायिताभिर्बहुकरितुरगस्यन्दनाभिर्घनाभिः ।
गर्जत्पर्जन्यतुल्यस्फुटपटहरवाध्मापिताशावकाशो
गत्वारौत्सीत् समन्ताद् द्रुतमथ मधुरामन्दिरं मागधेन्द्रः ॥५९॥

तदनु यदुसमूहैरन्वितौ जन्यशूरै-
र्मुसलधरमुकुन्दौ योद्धुमुत्तिष्ठमानौ ।
सशरशरधिचापप्रासवर्मासिचर्म-
त्रिदशपतिनिसृष्टं स्यन्दनद्वन्द्वमागात् ॥ ६० ॥

दृढतरपरिकरबन्धौ सगुणितकोदण्डसंहिताशितास्त्रौ ।
सपदि रथारूढौ तौ सङ्ग्राममभुवं प्रपेदाते ॥ ६१ ॥

कस्त्वं दुर्दान्त रे रे, शिशुपशुप ! जरासन्धभूमीश्वरोऽहं,
कस्मादत्रागतस्त्वं, यदुकुलमखिलं भस्मसात्कर्तुमेव ।
को हेतुस्तत्र, कंसक्षितिपतिनिधनं, का तवानेन हानिः,
जामाता मे स वीरो, भवतु, तव तु तद्ध्वंस युक्तानुयात्रा ॥६२॥

माधवमगधाधीशौ प्रश्नोत्तरवादिनाविति प्रसभम् ।
ववृषतुरस्त्रासारानत्रासारा जनास्त्रस्ताः ॥ ६३ ॥

पारश्वधिकाः केचन कतिचन
घोरमुसुण्ठीमुसलायुधकाः
पट्टिमशूलगदाभृत एके
याष्टीका अपि शाक्तीका अपि
कतिचित् प्रासिकधानुष्का अपि
कुन्तिन एके कुलिशकठोर-

कृपाणकराञ्चितपाणय इतरे
मुष्टामुष्टितलातालिसंभराः
समरहस्का मागधमाधव-
यौधा विदधुः शरशतविदलित-
करचरणोन्नतकरितुरगालि-
कळेबरनिर्यद्रुधिरधुनीजल-
मग्नोन्मग्नप्रकटकराळ-
गळारवभैरवकाळीकूळी-
कळकळघोषं शूलयतासय-
तारिभटानथ गदयत शक्तय-
तेति वदावदमदयविखण्डित-
मस्तकबन्धकबन्धनिरन्तर-
ताण्डवचण्डं खरतरशरशत-
पतनभयाकुलदूरपरिभ्रमदमरं समरम् ॥

उद्धं गिद्धंतगिद्धावलिगरुअगरुच्छाअपच्छाइअक्के
दुप्पेक्खे भूमिअक्के तुलिअगअघडाकाह्मिमेहिं तमोहिं ।
अण्णोण्णावट्टणुग्घोलिरपरसुगआखग्गसूलग्गणिता
दिप्पंता दीवकज्जं दिसि दिसि सिहिणो सव्वदो उव्वहंति ॥६४॥

[ऊर्ध्वं गृध्यद्गृध्रावलिगुरुकगरुच्छायप्रच्छादितार्के
दुष्प्रेक्ष्ये भूमिचक्रे तुलितगजघटाकाष्णिमभिस्तमोभिः ।
अन्योन्याघट्टनोद्घूर्णमानपरशुगदाखड्गशूलाग्रनीता
दीप्यमाना दीपकार्यं दिशि दिशि शिखिनः सर्वत उदवहन् ॥]

त्रस्तैरस्त्राभिपातादतिभृतकुतुकैराहवालोकने च
भ्राम्यद्भिर्दूरमूर्ध्वं वियति मुहुरथश्चाचिते खेचरौघैः ।
अन्योन्यामर्दभिन्नप्रशिथिलसिचयस्पष्टदृष्टस्तनीभि-
र्वीतव्रीळं व्रियन्ते स्म च मृधनिहता वीरहीराः सुरीभिः ॥६५॥

शिलीमुखः शातमुखो विपक्षतः
परापतन्नेव भटेन केनचित् ।
प्रकोष्ठघातेन निवर्तितस्ततः
प्रहर्तुरेवाच्छिनदाशु मस्तकम् ॥ ६६ ॥

अस्य त्रयोविंशतिमस्त्रवह्ना-
वक्षौहिणीराशु जुहाव कृष्णः ।
अमुं च बद्धं हलभृन्निहन्तु-
ममुञ्चदुक्त्यैव हरेररातिम् ॥ ६७ ॥

मणरहे अ रहे अ विभंजिए
मअहभूमिपई सअमेक्कओ ।
हळहरेण रणादु विसज्जिओ
णिअपुरं पविसेइ स ळज्जिओ ॥ ६८ ॥

[मनोरथे च रथे च विभञ्जिते
मगधभूमिपतिः स्वयमेककः ।
हलधरेण रणाद्विसर्जितो
निजपुरं प्राविशत् स लज्जितः ॥]

गते वत्सरे मत्सरेण प्रदीप्त-
स्तथोत्साहितश्चान्यराजन्यवर्गैः ।

त्रयोविंशतेरीश्वरोऽक्षौहिणीनां
प्रतस्थे स भूयोऽपि कृष्णं जिगीषुः ॥ ६९ ॥

युद्धार्थमागतस्यास्य मागधस्य स माधवः ।
सर्वामक्षौहिणीं हत्वा प्राग्वदेन न्यवर्तयत् ॥ ७० ॥

वारान् सप्तदशैवमेव स जरासन्धः पराभूतवान्
वीराग्रेसरमेत्य विग्रहविधौ नो निग्रहं प्राप्तवान् ।
सोऽप्यस्य त्रिशतीं च सैकनवतिं चाक्षौहिणीनामहन्
कृष्णः क्ष्मातलभारवारणरणक्रीडैकनिष्णातधीः ॥ ७१ ॥

कालेऽस्मिन् कलहप्रियो मुनिवृषा म्लेच्छत्रिकोट्याः पतिं
वेदब्रह्मविदूषकं स यवनं गत्वावगत्यादरम् ।
दिष्ट्या दृष्टिसुखं मुखं तव सखे ! पश्यामि दिश्यामिमां
विज्ञातुं भवतो विभूतिमधुना ह्यत्राहमायातवान् ॥ ७२ ॥

दृष्टा भोगवती पुरी फणभृतां दृष्टालकाख्या पुरी
वित्तेशस्य तथा पुरन्दरपुरी दृष्टामरावत्यपि ।
सर्वास्त्वत्पुरशिल्पकल्पनकलाशिक्षार्थमुत्पादित-
त्यक्तास्ताः खलु मन्महे महदहो माहात्म्यमस्याः पुरः ॥७३॥

किन्त्वेनां मधुरेति कापि विदिता वृष्ण्यन्धकानां पुरी
जेजेतीति त एव सम्प्रति सखे ! जल्पन्ति दुष्पौरुषाः ।
कृष्णो नाम चतुर्भुजोधृतगदाशङ्खारिपङ्केरुहो
मेघश्यामतनुः पुमानधिपतिस्तस्यास्तवायं रिपुः ॥ ७४ ॥

अजिताख्ये पुनरस्मिन्नजिते ते विश्वविजयिता विफला ।
इति किल नारदवचनं श्रुत्वा कुपितोऽवदद्यवनः । ७५॥

ही ही कह्णश्श भश्शीकळिअ कुळघळं विह्णिभोअंघआणं
वह्णिज्जाळव्व घोळा महयशिळदिआ झत्ति देहख्ख संघम् ।
शच्छंदं शंपहाळंगणकळहकळाशप्फळेच्छा मिळेच्छा
गच्छह्मा गव्वभाळं शमअह शमळे शाहु ळे शत्तवाणम् ॥ ७६ ॥

[ही ही कृष्णस्य भस्मीकृत्य कुलगृहं वृष्णिभोजान्धकानां
वह्निज्वालेव घोरा ममासिलतिका झटिति धक्ष्यति सङ्घम् ।
स्वच्छन्दं संप्रहाराङ्गणकलहकलासत्फलेच्छा म्लेच्छाः
गच्छामो गर्वभारं शमयथ समरे साधु रे शात्रवाणाम् ॥]

इत्थमादि विकत्थमानो मानमदान्धमानसो भुवनकण्टको यवनपतिरतिरोषभीषणभ्रुकुटिभङ्गपिशङ्गरूक्षाक्षिपुटविकटसटाजटिलदुर्निरीक्षमुखो मूर्खकुलमूर्धन्यो जन्यलम्पटस्फुटप्रचलदसिफलकपाणिरुत्थाय कोटित्रयपरिमितम्लेच्छबलपुरस्सरः सरभसं मधुरापुरमुद्दिश्य प्रातिष्ठत । आह स्म च 'भगवन् नारद गच्छतु भवानग्रतो विग्रहनिरीक्षासमग्राग्रहशालिन् ! वयं त्वनुपदमागच्छाम' इति ॥ ततश्च,

म्लेच्छैर्लक्षत्रिशत्या स खलु परिमितैस्साहसी मोहपाश-
प्रोन्नद्धो बौद्धराजः सह बहळमदक्रोधभारान्धचताः ।
आरुन्धाथो समन्तान्मधुरिपुनगरीमत्य मेघैरिवोच्चै-
र्मेरोरैरावताख्यः सलिलभृदलघुं मेखलां मेघकाले ॥ ७७ ॥

रुद्धां बौद्धपृतावलोक्य मधुरां कृष्णोऽगदीदग्रजं
युद्धप्राङ्गणमेव कष्टमसतामार्येयमस्मत्पुरी ।
त्याज्या पूज्यतमापि काममधुना जारोपसंपर्किणी
कन्येवेयमधन्यतामुपगता मन्ये बहुश्रीरपि । ७८ ॥

दर्पेणान्धतमः स मागधनृपः श्वो वा परश्वोऽथवा
सम्प्राप्ता बहुभिर्बलैरभिलषन्नष्टादशायोधनम् ।
मत्तो नार्हति मृत्युमेष कुमतिर्निग्राहयिष्याम्यमुं
केनाप्युत्तरकाल एव तदिदं त्यक्ष्याम एवास्पदम् ॥ ७९ ॥

इत्युक्त्वानुमतो हरिर्भगवता शेषेण शेषेशयो
यस्मिन्नम्बुनिधौ निधिस्त्रिजगतां तस्यैव भागे क्वचित् ।
निर्मातुं निलयं स निश्चितमतिः स्वर्ग्रामतक्ष स्मर-
न्नाहूयैनमचीकरत् पुरवरं मध्ये प्रतीचोऽम्बुधेः ॥ ८० ॥

जम्भारेरमरावतीति नगरी या सेयमम्भोनिधे-
रम्भस्सु प्रतिबिम्बितेव कनकस्तम्भाग्रसम्भाविता: ।
अम्भोदाळिपथातिगामुकमणीकुम्भीसहस्राश्रितैः
सम्पूर्णा मणिमन्दिरैरुदलसद्धर्म्यैश्च रम्या पुरी ॥ ८१ ॥

सर्वक्ष्माधरपक्षविक्षतिकृतो वज्राद्भिया वज्रिणः
स्वर्गाद्रिः स्वयमर्णवस्य सलिले मग्नश्चिराय स्थितः ।
उन्मज्जत्ययमेव सम्प्रति जलादिन्द्रानुजानुग्रहा-
दित्थं के न शशङ्किरे हरिपुरीं दृष्ट्वा सुवर्णात्मिकाम् ॥ ८२ ॥

कनकद्वारसहस्रैरनघद्युतिरुच्चसौधलक्षवती ।
द्वारवतीति ख्याता बभूव सा श्रीपतेर्नगरी ॥ ८३ ॥

देवेन्द्रः पारिजातप्रभृतिसुरतरून् प्राहिणोत् पञ्च किञ्च
श्वेतानश्वान् प्रचेता हिमगिरिशिखरश्रीमतः श्यामकर्णान् ।
वित्तेशः शङ्खपद्मादिकनिधिनवकं तत्तदात्मीयवस्तु
प्रायच्छँल्लोकपाला मुरमथितुरिदं पूर्वगेहप्रवेशे ॥ ८४ ॥

तां च द्वारवतीं पुरीमभिनभस्ताम्राश्ममुक्ताफल-
स्निग्धेन्द्रोपलरश्मिमिश्रणवशादिन्द्रायुधव्याञ्जिनीम् ।
शौरिर्द्वादशयोजनायतिमतीं निन्ये निजं माथुरं
वृन्दं योगबलेन सर्वमपि तन्मातापितृप्रष्ठकम् ॥ ८५ ॥

निर्मानुषान्तरमथो मधुरापुरं त-
न्म्लेच्छैर्बहिश्च परितः परिवार्यमाणम् ।
भुक्तोज्झितं फलमिवाजनि वारणेन
कापित्थमन्तरविभाविरशून्यभावम् ॥ ८६ ॥

सहाग्रजस्तत्र समागतो हरि-
र्निरायुधो नीलवलाहकच्छविः ।
चतुर्भुजो गोपुरवर्त्मना बहि-
र्जगाम बौद्धप्रवरस्य सन्निधौ ॥ ८७ ॥

सोऽयं कृष्णः सजलजलदश्यामळः पीतवासा
दोर्भिर्युक्तो युगसमतमस्थूलदीर्घैश्चतुर्भिः ।
चिह्नं सर्वं वहति यदसौ नारदोक्तं तदेनं
विध्वंसिष्ये त्रिमतमिति स म्लेच्छराण्निश्चिकाय ॥ ८८ ॥

अये निरायुधोऽसौ तदहमपि निरायुध एव एनमभियोक्ष्ये । निरायुधेन सह न सायुधः सङ्ग्रामयेतेति हि वीरधर्मप्रवादः । अथवा किमायुधेन । नखच्छेद्यं हि मृणाळकाण्डं कः परशुना छिन्द्यात् ॥

उद्दामोत्कटकालदण्डसदृशा दोर्दण्डयुग्मेन स
स्फीतख्यातिरहं हि कालयवनो गृह्णामि वेगादमुम् ।
इत्थं दूरनिरस्तखड्गफलको हस्तौ प्रसार्याभ्यगा-
दभ्याशं स यदापलायत तदा दामोदरो भीतवत् ॥ ८९ ॥

गच्छंतं झत्ति पच्छा अणुसरइ मिलेच्छाहिवो गह्निदुं णं
सच्छंदं सेलरंधंमि खु कुहइ णिलीणंमि तस्सिं मुउंदे ।
मूढो तं चेअ रंधं पविसिअ मुउकुंदं खु तस्सिं सअंतं
पेच्छंतो षं मुउंदो त्ति अ मुणिअ भणाइ ह्म जिह्मस्सहावो ॥९०॥

गच्छन्तं झटिति पश्चादन्वसरन्म्लेच्छाधिपो ग्रहीतुमेनं
स्वच्छन्दं शैलरन्ध्रे खलु कुहचिन्निलीने तस्मिन् मुकुन्दे ।
मूढस्तमेव रन्ध्रं प्रविश्य मुचुकुन्दं खलु तस्मिन् स्वपन्तं
पश्यन्नेनं मुकुन्द इति च मत्वा भणति स्म जिह्मस्वभावः ॥ ९१ ॥

मत्तो भीतः प्रधावन्निह गिरिकुहरे हन्त निद्रायसे किं
मत्तोदं वाञ्छतस्ते ननु मनुजवटा! प्रत्युतैष स्वतोदः ।
इत्थं पादेन तस्योरसि विनिहितवान् बौद्ध औद्धत्यशाली
दृष्टो रुष्टोत्थितेन स्वरुचिभिरमुना भस्मभूयं गतश्च ॥ ९२ ॥

अतिष्ठतास्मै भगवान् मुकुन्द-
श्चतुर्भुजश्चक्रगदाब्जशङ्खी ।
किरीटहाराङ्गदवन्यमाली
महीभुजे मन्दहसन्मुखेन्दुः ॥ ९३ ॥

स्फुरन्मकरकुण्डलं मणिकिरीटहारोज्ज्वलं
सवत्सपदकौस्तुभस्तबकितोरुवक्षस्थलम् ।
कटीतटदृढोल्लसत्कनककाञ्चिपीताम्बरं
परं पुरुषमानमन्नृपतिरिष्टदं पृष्टवान् ॥ ९४ ॥

कस्त्वं पुण्यकृतोर्ममैष विषयो यो जायसे चक्षुषो-
श्चन्द्रो वा किमु भास्करः स भगवानिन्द्रोऽथवा शङ्करः ।

यद्वा विश्वचराचरत्रिजगतीनाथः स विष्णुः स्वयं
यत्तेजोभिरहो गुहान्धतमसं ध्वस्तं समस्तं खलु ॥ ९५ ॥

अहं तु कस्तावदिति चेदुच्यते

इक्ष्वाकुकुलजलधिपूर्णचन्द्रस्य तत्रभवतो यौवनाश्वस्य मान्धातुम धातुरिव पुलस्त्यमपत्यमवगच्छतु भवान् नाम्ना च मुचुकुन्द इति पुरातनं मां पुराविदो विदुः। देवासुरसङ्ग्रामेषु देवगृह्याः सूर्यवंशसंभवा हि राजानः त्रिदिवमवन्तीति कृत्वा तत्र भवान् वृत्रशत्रुर्मामाहूय त्रिदिवपरित्राणार्थं तत्र बहून् कालानावासयति स्म । गतवति च महति काले भगवतः श्रीपरमेश्वरस्य भगवत्यामचलदुहितरि तारकासुरहविर्जिक्षितुमरणाविव पावके पावकौ भगवति सम्भूते कुमारे शम्भुशासनान्निलिम्पसेनान्यां च सञ्जाते महेन्द्रेण चिरपरित्यक्तस्वजनां स्वपुरीम् अयोध्यामेव सबहुमानं प्रस्थापितश्चाहं चिरकालमस्वप्नानां मध्ये वर्तमानत्वाद् बहुकालजागरणतन्द्रालुरिमामद्रिगुहामासाद्य अस्यामेतावन्तं कालमस्वाप्सम् । इदानीञ्च केनापि प्रतिबोधितोऽस्मि । स चाजानत एव ममाक्षिज्योतिषि भस्मसादभवत् । भवांश्च महानुभावोऽक्षिगोचरोऽभूत ।

आह स्म स्मितचन्द्रिकापरिलसद्वक्त्रेन्दुबिम्बो हरि-
र्मोहक्रोधमनोभवादिकमहावीचिच्छटादुस्तरम् ।
यत्पादस्मरणप्लवेन सुधियः संसारवाराम्निधिं
निष्पन्देन तरन्ति निर्जनिमृतिर्यः कोऽपि सोऽहं पुमान् ॥९६॥

विद्यात्माहं विमलपरमानन्दधामा त्रिधामा
विद्योतेऽन्तर्जलमिव रविः सर्वभूतेषु भिन्नः ।
यद्यद्वाञ्छेदवनतिपरो भक्तिनिम्नान्तरात्मा
जीवस्तत्तद्वितरितुमहं विग्रही बोभवीमि ॥ ९७ ॥

कंसादीनां तु दीनां भुवमतिमहता हन्त भारेण दारा-
नारादाराधयिष्यन्नविकलखलिनीखण्डनक्रीडनेन ।
जातोऽहं वासुदेवो यदुषु स वसुदेवात्मजो देवकीं ता-
मम्बामाधाय किं वा नृवर! वरदतो वाञ्छसि ब्रूहि मत्तः ॥९८॥

अयं तु यवनाधीशो दग्धस्त्वत्तेजसा खलः ।
अजानतामपि सतां स्थान एव प्रवृत्तयः ॥ ९९ ॥

मान्धातुस्तनयो ननाम विनयोदारो बभाषे च तं
मायागोपकुमार! मारसदृशश्रीमन्नमस्ते हरे! ।
नाथ! त्वन्महिमा न वाङ्मनसयोरध्वानमाहिण्डते
के वा देव! तव स्तवे वयममी चिन्मात्रशर्मात्मनः ॥ १०० ॥

गर्गेणेदमुदाहृतं प्रथमतो याज्यस्य वंशे यदो-
र्देवक्यास्तनयो जनिष्यति जगन्नाथो रमावल्लभः ।
कंसादींश्च हनिष्यति क्षितिभरव्युच्छित्तये भक्तिम-
त्संसारार्णवकर्णधार इति यत् तथ्यञ्च पथ्यञ्च तत् ॥ १०१ ॥

नामी कामद! कामयेमहि महीभर्तृत्वलाभात्मकं
दुःखं तद् दुरुदर्कमर्ककिरणेष्वम्बुभ्रमोऽयं यथा ।
आयासाय मृगस्य केवलमहो पुंसस्तथास्मिन् सुख-
भ्रान्तिः पातककूपपातकमिदं को नाम वाञ्छेत् सुधीः ॥१०२॥

त्वत्पादाम्बुजभक्तिरेव महती भूयान्ममाधोक्षज!
त्वद्भक्तैः सह सङ्गमस्तव कथापीयूषपानोत्सुकी ।
जाग्रत्स्वप्नसुषुप्तिषु त्वदनुसन्धानं च सन्तोषिणः
सर्वत्रापि ममास्तु मुक्तिरमला येन स्वयं सेत्स्यते ॥ १०३ ॥

अष्टाङ्गयोगमैत्र्यादिभावनात्मतपोव्रतैः ।
प्रयत्नलभ्या मुक्तिर्या भक्त्या सा सुलभा भवेत् ॥ १०४ ॥

मुकुन्द एवं मुचुकुन्दमूचिवा-
नमन्दसन्तोषगुणस्य ते सखे ! ।
सुखेन लभ्या खलु मुक्तिरात्मनो
विशुद्धये किन्तु तपो विधीयताम् ॥ १०५ ॥

रक्षाधिकारसहभूः खलु भूपतीनां
हिंसादिदोषततिरेतदपोहनाय ।
कार्यं तपो न तदपोहनमन्यथा स्यात्
तस्मात्तपश्चर ततस्तव मुक्तिरस्तु ॥ १०६ ॥

इत्यभिधाय तिरोभवति भगवति मुकुन्दे मुचुकुन्दस्तु तं भगवदधिष्ठितं धरणिभागं प्रदक्षिणीकृत्य मुहुर्मुहुः प्रणमन्नुत्तरां दिशमुद्दिश्य गच्छन् गन्धमादनं धराधरमधिरुह्य तत्र च बदर्याश्रमं नाम नरनारायणतपोवनं पावनमुपगम्य सम्यगनुष्ठितसकलनियमतन्त्रस्वतन्त्रः तपस्तप्यते स्म ।

माधवस्तु बौद्धकोटित्रयनिरुद्धमन्तःस्थितबलभद्रं मधुरामन्दिरमुपगम्य तत्र प्रकाशमानो मानशालिना तेनाग्रजेन सह बहिर्निर्गत्य भास्वानिव मरीचिनिकुरुम्बैस्तिमिरकदम्बमस्त्रशस्त्रसहस्रैरखिलमपि बौद्धसैन्यमुपसंहृत्य तत्करङ्करुधिरमस्तिष्कमेदोऽस्थिमज्जापिच्छिलितपर्यन्तभुवमशिवशिवावलकङ्कसङ्घसङ्कटनिकटां विकटविविधविचित्रप्रदेशमधुरामपि मधुरापुरीमशुचितया परित्यज्य ततो निष्कामश्चक्रायुधः साग्रजो द्वारवतीं प्रति पदातिरेव गच्छन्नर्धमार्गे परापतन्तं जरासन्धमष्टादशसमरार्थं सन्नद्धसैनिकमवलोक्य 'नैनमहामिह निग्रहिष्यामि

विजयतामयमिदानीम् अनेन च मद्विजयेन विजृम्भमाणमदतया बहुविधानधर्मानेष समुच्छ्रयिष्यति तदा युधिष्ठिरसहोदरेण वृकोदरेणैनं निग्राहयिष्यामी'ति निश्चित्य भीतिमभिनीय पलायामास ।

म्लेच्छानुच्छिद्य सद्यो बहुधननिचयं वाहयन् रासभोष्ट्रै-
र्गच्छन्नप्यच्युतस्तं मगधनृपमुदीक्ष्यैतमुज्झाश्चकार ।
अत्रासोऽप्याशु सत्रासवदथ सबलो धावमानो महाद्रा-
वालीनस्तावदेनं द्रुतमनुगतवान् मागधोऽनीकिनीभिः ॥१०७॥

प्रवर्षणं नाम महीध्रमुच्चकै-
रमुं समारुह्य निलीनयोस्तयोः ।
जरासुतस्तं परितो महानलं
प्रदीपयामास मदान्ध इन्धनैः ॥ १०८ ॥

दग्धौ तौ मन्यमानोऽसौ मगधानामधीश्वरः ।
ससैनिको निजामेव नगरीं प्रति यातवान् ॥ १०९ ॥

प्रायोऽस्माद्दशयोजनोन्नतिमतश्शैलादुपप्लुत्य तौ
प्राप्तौ द्वारवतीं पयोधिपरिखामेकान्तरम्यां पुरीम् ।
पित्राद्यैरथ तत्र मित्रनिवहैस्सत्रा च गोत्रामर-
श्रेष्ठैः प्रेष्ठतमौ सतां चिरमरसातां बलश्रीधरौ ॥ ११० ॥

॥ इति श्रीभागवतचम्पुप्रबन्धे रामपाणिवादविरचिते
सानन्दगोविन्दो नाम सप्तमः स्तबकः ॥

भागवतचम्पूगतानां

श्लोकानामनुक्रमणी ।

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
अअणणन्तो विहिं	४	अरिष्टघाती	६९
अक्रूरं प्रात	८८	अवन्तिदेशे	१०३
अक्रूरसूत	८०	अष्टाङ्गयोग	१२३
अक्रूरस्य	८४	अष्टौ कंसस्य	९९
अक्रूरेण	९९	अस्तक्ष्माभृदाधित्यका	७६
अक्रूरोक्ति	८२	अस्मभ्यं	२१
अग्रे सप्रग्र	८०	अस्मानेष	८१
अघासुरो	७९	अस्मान्मा	४२
अङ्गराग	९१	अस्मिन्नेव	१०७
अजिताख्ये	११६	अस्य त्रयो	११५
अतिष्ठतास्मै	१२०	अस्वन्तस्वप्न	९४
अत्र क्रीडितं	७५	अहं पुरोऽहं	४७
अथार्धमार्गे	६	अहो भाग्यं	१०९
अदृष्टं यद्वस्तु	३९	अहो सौभाग्यं	५४
अधो ननृतु	६५	आधून्वन्	२३
अनक्षरं	१०७	आनकदुन्दुभि	७०
अनादृत्य	२	आनन्दाकुल	४६
अन्धो जन्मत एव	१०५	आपायामृत	३१
अन्यासामुत्सुकत्वं	६३	आम्रार्द्रपल्लव	६३
अन्विच्छ त्वा	५७	आरोहंतो	७६
अपगतमेघ	३४	आर्यैः स्थैर्य	८०
अप्सु व्यापन्न	१०४	आलिङ्गत्येष	६०
अमाङ्क्षुः	३३	आळीं काळिय	५९
अयं तु यवन	१२२	आवाभ्यामभ्यमिश्रा	९६

श्लोकः	पुटम्	श्लोकः	पुटम्
आश्लिक्षाम	३२	उत्तंसीकृत	७४
आसन्ध्यं	९३	उत्तुङ्गैः सप्त	८७
आह स	१२१	उत्थाय प्रात	७९
इअ भणिअ फणी	२१	उत्पत्स्यन्ते	७
इअ भणिअ समु	४	उद्दामोत्कट	११९
इच्छामो वयं	४९	उद्धं गिद्धंत	११४
इत्यादिभिरपि	७	उन्मीलिताक्ष	३०
इति तस्य	१११	उपससर्प स	२२
इति तासां गिरः	२५	उम्हेणं गिंहजेणं	२९
इति तासां व्रज	११०	एकं कुञ्जर	९५
इति निवेदय	५७	एकामेव कुमुद्वतीं	५४
इति पशुप	५२	एकैका मासि	५३
इति ब्रुवाणो	१०२	एवं कृते तु	३४
इति रथादवरुह्य	७५	एवंप्रायैर्दीन	८३
इति स महती	१००	एवं सप्ताह	४३
इत्थं तत्थ	२७	एव्वं गव्वेण	९८
इत्थं तस्य	७०	एव्वं णो वअणाइ	१०६
इत्थं ब्रुवाणे	९६	एव्वं सव्वासु	६२
इत्थं विस्मय	११०	एशा ळोशप्पाळित्ता	१६
इत्युक्त्वा गत	९	एषा कापि मृगी	५८
इत्युक्त्वानुमतो	११८	कंसः संसदि	७२
इमा हि क्रूरो	८२	कंसादीनां तु	१२२
इष्टापूर्तरुप	११०	कंसेन प्रहितो	७०
इष्टिवृष्टि	३८	कच्चित् स्वागत	७७
ईक्षामास	१९	कण्ठे जग्राह	६३
उत्क्षिप्तस्य	४२	कण्णाडाणत्त	९६

श्लोकः	पृष्ठम्
कतिपयदिवस	९१
कतिषुचन	८
कथमपि मम	६४
कदाचन तदा	१०१
कदाचन मुदा	२७
कदाचिद् गोपालः	७२
कनकखचित	१८
कनकद्वार	११८
कलिन्दतनया	८५
कल्पन्तामिह	५३
कष्टं भो मृगपोत	९७
कस्कोऽयं काल	२१
कस्त्वं दुर्दान्त	११३
कस्त्वं पुण्यकृतो	१२०
काकोलूक	४६
काचन भर्तृ	३७
काचित् काञ्चन	४६
काचित् त्वरा	४७
कान्तारसञ्चरण	६१
कायः प्रायः	२२
कारुण्यामृतसार	२०
कार्याण्यन्यपि	३२
कालश्चासौ	५९
कालिन्दी पुलिन	५३
कालेऽस्मिन् कंस	११२
कालेऽस्मिन् कलह	७०
कालेऽस्मिन् कलह	११६
कालेऽस्मिन्नमरा	५
काल्ये बाल्ये	९४
कासि त्वं सुमुखि	९०
किन्त्वेनां मधुरे	११६
किमपि हृषित	८६
किमिह बहुना	३
कियच्चिरं त्वा	७३
कुत्राहं देव	२५
कुरवककुसुम	६३
केशितुरङ्ग	७१
कोऽअंडराक्खि	९२
कोणव्यापृति	६४
कोदण्डाध्वर	७९
को वस्तात	३८
कौन्तेयान्	११२
क्रीडन्तं तत्र	२८
क्वचित् स्वागत	४९
क्वणद्वंशीनाळी	१०९
क्वासौ क्वासाविति	१४
क्षिप्रं ते विप्रदारा	३७
खिण्णं णं पणइंदं	२३
गंधव्वा गअणम्मि	२४
गंधव्वा सपुरंधिआ	६४
गच्छंतं झत्ति	१२०
गच्छ त्वं गान्दिनेय	७३

श्लोकः	पृष्ठम्
गच्छाभस्तावत्	३
गते वत्सरे	११५
गते सति दिवं	४४
गब्भट्ठिअस्स	१०
गमिश्शं महाळाअ	१७
गम्भीरस्तनित	४१
गम्भीराम्भोद	३०
गर्वेणेदं	१२२
गळनाळगळन्	२४
गात्रं वक्रचरं	९१
गान्दिनीसुत	८७
गिरामपि	१२
गोत्रावृद्धिकरं	३७
गोदोहव्यापृत	७७
गोपा गोवर्धनाद्रेरधि	३९
गोपीषु तासु	५५
गोष्ठं तावदुपेत्य	३५
चञ्चत्पिञ्छावतंसं	१०८
चण्डं कोदण्ड	९२
चण्डाघातं	९५
चण्डैर्मुष्टिविघातैः	९७
चतुर्भुजं	१२
चला परेषां	७
चाणूरो मुष्टिकश्च	७२
चाणूरो मुष्टिकश्च	९६
चापयज्ञापदेशेन	७३
चूताशोकपलाश	४५
छुहातद्धावेस	३६
जंतूणं जणणं	७
जठरं विशता	९
जनकजननी	१०१
जनितमनुज	१६
जम्भारेरमरा	११८
जहिं खु तुइ	१२
जाते तस्मिन्	११
जानीमो वयं	५२
जीव्यास्त्वं चिर	१०५
झलञ्झलितनूपुरं	२३
ढज्जंतं विरहग्गिणा	५७
णमंतं णुवंतं च	९०
तं देशं त्वं	५९
तज्जन्यं पाञ्चजन्य	१०५
तणावत्तो णाअं	२५
ततिमिव तिमिराणां	१०
तत्क्षणोन्मिषित	३०
तत्र द्वित्रावशिष्टे	७२
तत्र प्रत्यक्षदृष्टे	६३
तत्रामूरुपवेश्य	५३
तत्रोच्चैरुन्मदिष्णु	५९
तथाप्यभ्यार्थिता	९७
तदनु यदुसमूह	११३
तदहमसित	७६

श्लोक:	पुटम्	श्लोक:	पुटम्
तदैव वसुदेवं	७०	दाशार्हवृष्णि	१०२
तद्भङ्गध्वनिरुद्ध	९२	दिग्दन्तावळ	९९
तन्त्रीभिः स्वर	६५	दिव्या काचिदवोचत्	१६
तमस्तुतां	१२	दिष्ट्या दृष्टिपथं	६०
तर्कव्याकरण	१०३	दीहप्पोहगुहं	७१
तल्पं कल्पित	६४	दुग्धं किलार्धं	४७
तस्मादस्माकं	१०३	दुग्धं गा दुहती	७५
तस्मिन्नेव प्रभाते	१७	दुग्धं दोदुहती	४७
तस्मिन् सङ्क्रीड	६९	दुग्धाम्भोधेरधि	४
तां च द्वारवतीं	११९	दुट्ठं रुट्ठं च	६९
तावत्तन्मुष्टि	९८	दुष्टाधोरण	९४
तावद्देवाधिराजः	४३	दूतस्त्वं किमु	१०८
तासां प्रासाद	८८	दूयध्वं मास्म	८२
ताहे पंकअसंभवं	८	देवकीं वसुदेवं च	९
तिरोभूते तस्मिन्	५५	देवराज	५
तीरस्थं सूरजाया	२०	देवेन्द्रः पारिजात	११८
तीसे निस्सेस	१०	देवोऽप्येवं जगाद	१३
त्रस्तैरस्त्राभि	११५	दृढतरपरिकर	११३
त्वं नो लक्ष्मीरमण	५१	दृष्टा भोगवती	११६
त्वत्पादाम्बुज	१२२	दृष्टो वा भवतीभि	४८
दंक्ष्यामि दन्दशूको	२१	दृष्ट्वा केशिवधं	७१
दग्धौ तौ मन्थ	१२४	द्वन्द्वयुद्धं	९७
दुट्ठं दुट्ठसरीसपेण	६८	द्वे च द्वे च प्रणयि	६५
दर्पेणान्धतमः	११८	धण्णा गीवंगणाओ	८८
दहनममुमैन्द्र	३०	धनुर्मखं द्रष्टुं	७९
दारितान्मुदिर	३१	धन्या सा खलु	६२

श्लोकः	पृष्ठम्
धन्यास्ता वन्यमालिन्	८३
धीमानानक	१०२
नम्रो नोदकं	३४
नत्वा कृष्ण उवाच	१०१
नामी कामद	१२२
नाम्ना कृष्ण	६८
नारिष्टोऽहं	९६
निमील्य नेत्राणि	३०
निर्मानुष	११९
निर्वृत्तेऽस्मिन्	६७
निवृत्तास्ते	३६
निशम्य तस्या	१४
निष्यन्दैश्चन्दन	५३
निस्तीर्य कार्य	८४
नीतिशास्त्रविषये	१०२
नीपाग्राद्	२०
पच्चूसम्मि खु	३१
पडिण्णाअ पुव्वं	५१
परिक्रामन्नस्मात्	९०
परिधारितानि	३३
पर्यन्तनिर्यद्	४२
पर्यसपक्ष	४३
पळंबा अंतीए	६०
पश्चात्तापपुरस्सरो	३४
पाणाणिप्फुट	८१
पाणौ वेणुः स्फुरति	५८

श्लोकः	पृष्ठम्
पादाववष्टभ्य	९१
पाळेआअळ	१००
पितृष्वस्रा	११२
पुरन्दरो वाथ	२१
पुराभूतैः पुण्यैः	१७
पुळिन्दवरसुन्दरी	१८
पुष्करविवर	९५
पूजामाधाय	९०
पौष्पं तल्पं क्वचन	६४
प्रणम्य गोविन्द	४४
प्रत्यासन्न	७५
प्रभातायां तस्यां	१६
प्रलम्बघ्नं कृष्णः	२९
प्रलम्बवध	,,
प्रलम्बश्चाचिन्तज्झटिति	२८
प्रवर्षणं नाम	१२४
प्रसाधिकाया	४७
प्रसारिताभ्यां	२०
प्रसूतमात्रः स्वयं	१०१
प्रस्तुतमेदं	३८
प्रस्फुटिताम्र	२३
प्राणाः पञ्च स	१०९
प्रातः स्नातानुलिप्तौ	९४
प्रातः स्वप्नजमग्रजं	१८
प्रातर्दृष्ट्वा	१०८
प्रातस्तं हस्तिन	११२

श्लोकः	पुटम्	श्लोकः	पुटम्
प्रातस्तरां प्रबुधितैः	२७	मथुरापुर	१११
प्राप्य च मधुरां	१४	मध्ये मध्ये स	६५
प्रायोऽस्मादृश	१२४	मनोरथैर्नः	१०९
प्रालेयावरण	३५	नन्दं नन्दगृह	७४
प्राह स्मोद्धवं	१०६	मया सह मया सह	५४
फणानां सहस्रेऽपि	२४	मलयपवन	५२
बालाग्रे परिगृह्य	९५	मलिनपट	८९
बुड्डंतो स पुणो वि	८५	माकन्दप्रसव	५७
ब्रह्मानन्दमहा	४५	माकन्दाशोक	५२
भक्तप्रदा मुदा	३७	मातस्तात	२७
भवताधिशिलं	७०	मातुर्नः सहजस्य	८४
भास्करः स्वकर	३१	माधवमगध	११३
भूमाबानम्र	६१	माधुर्यादिगुणैः	८१
भो भोः कालिय	२५	मानुष्योक्त्या	५८
भो भो भोज	७	मान्धातुस्तनय	१२२
भो भो वीरभटाः	९८	मा मा हिंसीः	१५
भो भो वीरवतंस	१५	माश्लेष स्वतनु	५१
मग्नो वारिणि	८५	मा शोचिध्वं	१०६
मङ्गल्यैर्मधुसूदन	४४	मा स्म क्राम्यादितः	३
मज्जन्महोदधि	१०४	मुकुन्द एवं	१२३
मञ्जं काञ्चन	९५	मुग्धस्निग्ध	८१
मणरहे अ	११५	मुणेहि कज्जस्स	७९
मणिकनक	९२	मुदा मुकुन्दः	९०
मत्तो भीतः प्रभावन्	१२०	मेघश्यामतनो	१०८
मत्पदलाञ्छन	२६	मैवं वादीर्मदन	५०
मद्विश्लेषव्यथित	१०६	म्लेच्छानुच्छिद्य	१२४

श्लोकः	पुटम्	श्लोकः	पुटम्
म्लेच्छैर्लक्ष	११७	रोहंतो संदणं	७४
यत्प्रागाश्रुत	४५	लक्ष्मीकान्तेन	१
यथाचिन्तितं	२८	लक्ष्मीकान्तो	६७
यथा माधव	९७	लाजैः कृष्णं	८८
यथा यथा बिम्ब	४९	लोष्टैः कल्पित	७५
यस्यायं तरळी	४८	ळहुअरमह	८४
यावन्तः सन्ति	५४	वंदंतो णंदगोवं	७८
या सा शौरेः	९	वंसीणिस्सण	४८
युक्ता बहिर्मुखा	४१	वचंतं तं	१३
युद्धार्थमागत	११६	वज्राग्निस्फुरण	४१
युष्मानस्मत्	१०६	वत्सौ वामुपलाळ	१०१
योग्यामाजन्मनो	९७	वर्णाश्रयाख्यं	६६
रक्षाधिकार	१२३	वल्लव्यो वल्लकीभिः	६५
रङ्गे तौ रङ्गतः	९५	वसन्तश्चासन्तं	५१
रणम्मि गोवड्ढण	४०	वसित्वा समादाय	३५
रथारूढः प्रौढः	८६	वस्त्रापहारो	५२
रन्तुं योग्यानि	२६	वाणीमाकर्ण्य	३५
रात्रौ तत्र	६८	वातप्रेङ्खितकूल	१४
राधावक्त्रारविन्द	६७	वामेन बिभ्रद्	४३
राधे किं त्वामपि	६२	वारान् सप्तदश	११६
राधे जातेऽपराधे	१०९	वार्यतां तूर्यघोषो	९८
रामो वाम	७७	विंशतिमात्रक	६६
रासक्रीडाभि	१०८	विंशत्यक्षौहिणी	११३
रासक्रीडासु	८२	विधे तव विधेदृशी	८३
राहा सोहग्गगव्वं	६१	विद्या चक्षुरचार्मणं	१०३
रुद्धां बौद्ध	११७	विद्यात्मा हं	१२१

श्लोकः	पुटम्
विद्या हृद्या	१०५
विद्येवात्मप्रबोधं	११
विप्रप्रीत्या	३९
विप्राणां मणिहेम	५
विरम विरम	६
विरहनिरहङ्कारा	५५
विवेद कुहना	२८
विशदयशोदा	१०७
विश्वेशाय नमो	२४
वृष्णीनां यादवानां	९
वैरेणापि स्मरण	९९
व्यत्यस्ताङ्घ्रि	४६
व्याजो भोजपते	७६
व्यादीर्णे मुख	७१
व्यालीभिः साकं	२६
व्योमाख्यो	७२
व्रीळावत्योऽपि	३३
शरज्ज्योत्स्ना	८८
शरदि च शशि	१०५
शरदि परितः	३१
शरीरार्धे शम्भुः	६१
शर्यातिस्तनया	५०
शार्दूलेन समं	७७
शिलीमुख	११५
शुण्डाग्रावट	४४
शूद्रेभ्योऽन्नं	३६

श्लोकः	पुटम्
शूरात्मजः सपदि	८
शृणुत सुदृशः	८३
शेषाहितल्प	८६
श्रीकान्तः सह	२८
श्रीनारायण	१
श्रीमत्कालकळाय	७४
श्रुत्वा चारण	४१
श्रुत्वेदमम्बुधि	१०४
षट्पुत्रीमतिमात्र	१२
षड् गर्भाख्यान्	९
संदाणंदेण	४५
संदीवणिस्स	१०४
संदृष्टश्चेत्	५७
संयोगाद्धि	१११
स क्रूरो नरपति	७३
सक्रोधत्रास	६
सङ्क्रीडन्मणि	८१
सज्जो गर्ज्जत	४२
सत्कुर्वाणावथैनं	१०७
सत्यं तात वयं	३८
सन्देशो भोज	८०
समदाः प्रमदा	८२
सम्भाण्ड्य धौत	८९
सरसमित्यनया	९१
सरामं तं कृष्णं	७३
सर्वक्ष्माधर	११८

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
सर्वासां नः	५८	स्फुरन्मकर	१२
सव्वाणं गव्विणीणं	५५	स्फुरन्मकर	१२०
सहाग्रजस्तत्र	११९	स्मारं घोरं ज्वर	४९
सा तावदङ्क	१०	स्मारं रूपं तृणमिव	५१
सानन्देनाथ	६९	स्मितमधुर	३४
सान्द्रोन्मेष	४९	स्वच्छाम्भस्सु	३०
सायं कृत्यानि	९३	स्वयं च गोकुल	९
सारथ्यकर्मणि	६	स्वान् स्वानेव	४९
साहं तो हळिना	९२	स्वैरं सैरन्ध्रि	१११
सुचेष्टितानां	१०३	हंभोः कुम्भिनि	५८
सुणंता तं वाणिं	३९	हंहो सिंहस्य	४१
सुन्दरीणां वचः	३४	हंहो सिंहोरु	११२
सुप्तोत्थिता	२०	हरिसंदेस	१०७
सेण्णेहिं	३	हस्तग्राहं नियुद्धं	९७
सोक्खं दुक्खं	१०९	हस्तिमस्तक	१
सोढव्याः सप्त	२	हा कृष्ण माधव	८३
सोऽयं कृष्णः	११९	हासश्रीभास	५३
सोष्माणं ग्रीष्म	३०	हाहा गोविन्द	५५
स्तन्यं ददौ	१८	हिंसा कंस	६
स्तेयं बाल	३३	हिरण्यकशिपो	९८
स्त्रीणां दैवतमत्र	५०	हीही कण्हस्स	११७
स्त्रीणामम्बर	३४	हृद्यं विद्याधरीणां	९९
स्थित्वा तत्र	१११	हे तात व्रजतु	१०२
स्नानं भोजन	५९	हेमन्तर्तुः सम्प्रति	३५